CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनकाविश्वामित्रम्

5860

डॉ. हरिनारायण दीक्षितः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

Pratibha Prakashan
A-393, Shastri Nagar
DELHI-110052

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनकाविश्वामित्रम्

(नाटकम्)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनकाविश्वामित्रम्

(नाटकम्)

रचयिता

डॉ० हरिनारायण दीक्षितः

एम० ए०, पी-एच० डी०, डी० लिट्०,
व्याकरणाचार्यः, सांख्य-योगाचार्यः, साहित्याचार्यः, साहित्यरत्नम्,
नैनीताले कुमायूं विश्वविद्यालये उपाचार्योऽध्यक्षश्च

ईस्टर्न बुक लिंकर्स

दिल्ली : (भारतम्)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनकाविश्वामित्रम् (नाटकम्)

रचयिता—डॉ० हरिनारायण दीक्षितः

प्रकाशकः—ईस्टर्न बुक लिंकर्स,
5825, न्यू चन्द्रावल, जवाहरनगर, दिल्ली-110007

प्रथमं संस्करणम्—१९८४ ई०

मूल्यम्—रु० ४०.००

पुनः प्रकाशनम्—लेखकाधीनम्



मुद्रकः—अरुण कम्पोजिंग ऐजेन्सी
D—१०२ नई बस्ती, सीलमपुर, दिल्ली-५३

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

MENAKĀ VISVĀMITRAM

(DRAMA)

By

DR. HARI NARAYAN DIKSHIT

M.A., Ph. D., D. Litt., Vyakaranacharya,
Sankhyayogacharya, Sahityacharya, Sahityaratna
Reader & Head of the Department of Sanskrit
Kumaun University, NAINITAL (U.P.)

Eastern Book Linkers
DELHI (INDIA)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

MENAKĀ VISVĀMITRAM (DRAMA)

©*Author* : DR. HARI NARAYAN DIKSHIT

Publishers : EASTERN BOOK LINKERS
5825, New Chandrawal Road,
Jawaharnagar, Delhi-110007

Edition : First, 1984

Price : Rs. 40.00

Printers : Arun Composing Agency, D-102, New Basti,
Seelampur, Delhi-110053.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

समर्पणम्

ययोर्यू नोर्हतस्स्नेहः समाजेन जनेन वा ।
ताभ्यां हि मेनकाविश्वामित्रं नाटकमर्प्यते ।।

– हरिनारायण दीक्षितः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निजं विधातुं विपुलं निकेतनं
करोति लूनं सदनं परस्य यः।
तमीदृशं लोकनिपीडकं जनं
विजेतुकामः प्रभविष्यतीह कः ? ॥

—मेनकाविश्वामित्रम्, ८/२

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

PREFACE

Fortunately I taught the Abhijñāna Śākuntalam for several years to the students. So every year it was very necessary for me in class at last to suggest and deal with some critical important Questions about the text as to judge the genius of Kālidāsa, the great dramatist of the World of the Sanskrit Literature; and still I fairly remember that the Characterisation always stood as an important and a very interesting question amongst all of them. In accordance with it Duṣyanta, Kaṇva, Durvāsā, Śārṅgarava, Śāradvat, Vidūṣaka, Śakuntalā, Anasūyā, Priyaṁvadā, Gautamī etc. were always considered as important characters; but Viśvāmitra and Menakā were always neglected. I felt that Kālidāsa also very slightingly mentioned their names in his drama. So there was none either to ask or to know about them. But I always had a sincere sympathy with both of them; because the sexual companionship between Menakā and Viśvāmitra who were the great personalities of that time in their respective fields, gently had a heart-touching significance in my opinion. I agree to this fact that Menakā was under the pressure of Indra when she reached Viśvāmitra and began to entice him towards herself; but after having come into close contact with Viśvāmitra, she must not be supposed to remain the same, particularly when she gave birth to his baby. My mind is never ready to accept that any woman who legally and morally either has been or can be one's beloved wife, leaves her newly-born baby and her sincere lover, and in the same way I see none of men who is well-to-do in all the aspects of social values, forgets suddenly his beloved wife unless he is accursed. Even in the society of animals, birds etc. such a hard-heartedness and cruelty are not seen anywhere in the entire world. To me it seems an unbelievable

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

the worst blemish on the most revered holy motherhood. Therefore the legend, regarding the close union of Menakā and Viśvāmitra, as such, is not acceptable to me at all ; but this legend drew my attention so deeply that I thought to introduce this unique pair to the field of Sanskrit Literature with my own views and began to compose a drama pertaining to the conjugal love between Menakā and Viśvāmitra with possible social and poetical justice for them; and the result of that is now in your hand in the form of this book under the title as 'Menakā Viśvāmitram' written in our Sanskrit language.

Since there is very a little and non-psychological narration in the Purāṇas by Veda Vyāsa, regarding the love affair between Menakā and Viśvāmitra, I have necessarily knit almost the whole plot of this drama in my own way. So the situation, the development, the fruitfulness and the result of the aforesaid love-affair have been arranged by me, but with all the possibilities concerned accordingly. I shall remember the night of the January 23, 1983, when my pen began to compose the first line of this drama. Since then upto the June 12, 1983, my mind and pen remained mostly busy with the composition of the same and I was happy to see the completeness of the 2/3 portion of the work. But unfortunately an inevitable and unpleasant mental atmosphere surrounded me on the June 13, 1983 suddenly and badly; which continued till the August 27, 1983. Therefore during this period my pen remained totally unable to produce any line for the Menakā-Viśvāmitram. I thank my God, who inspired me and my pen again on the August 28, 1983 for the composition of the drama as to complete the same as early as possible. So I engaged myself again in the composing of the drama; and I felt very happy on thursday, October 6, 1983 at 10.30 A. M. while my pen was generating the last line of the Menakā-Viśvāmitram.

Now this drama is modestly reaching the hands of the learned scholars and the lovers of the Sanskrit Literature. In and after having gone through this drama, if they feel a

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

little pleasure in them, I will consider my labour successful as well as rewarded.

My sincere thanks are very much due to Dr. (Km.) Kiran Tandon, my colleague, Lecturer in the department of Sanskrit, Kumaun University, Naini Tal (U. P.), who wholeheartedly made this fair and worthy for publication with her valuable suggestions. I thank also Mr. Sham Malhotra, the proprietor of the Eastern Book Linkers, Jawahar Nagar, New Chandrawal, Delhi-7, who published this happily with great zeal without any delay on his part. Although every care is taken in the press for the correct printing, yet there may be some errors; for which the readers are gently requested kindly to excuse me.

With this short foreword now I forward the Menakā Viśvāmitram towards the world of the Sanskrit Literature and hope this will be received there affectionately.

Vasanta Panchami
February 7, 1984
Kumaun University
NAINI TAL (U. P.).

—Hari Narayan Dikshit

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पात्राणि

पुरुषपात्राणि

१. विश्वामित्रः (नायकः)
२. इन्द्रः (खलनायकः)
३. कण्वः (विश्वामित्रस्य सखा)
४. ब्रह्मा (अदृश्यरूपः)
५. नारदः
६. अग्निदेवः
७. वायुदेवः
८. सोमदेवः
९. कामदेवः
१०. मधुः
११. देवलः (विश्वामित्रस्य शिष्यः)
१२. बलव्रतः (विश्वामित्रस्य शिष्यः)
१३. शार्ङ्गरवः (कण्वस्य शिष्यः)
१४-१६. त्रयस्तपस्विनः (विश्वामित्रस्य अतिथयः)
१७-२०. चत्वारो भद्रजनाः (विश्वामित्रस्य प्रशंसकाः)
२१. देवव्रतः (भ्रान्तो युवा)
२२. मेधाव्रतः (भ्रान्तस्य यूनः पिता)
२३. ऋतंवदः (इन्द्रस्य वैतालिकः)
२४. प्रियंवदः (इन्द्रस्य वैतालिकः)
२५. प्रथमसूत्रधारः
२६. द्वितीयसूत्रधारः
२७. अन्ये देवाः (इन्द्रस्य सभासदः)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्त्रीपात्राणि

१. मेनका (नायिका)
२. शची (इन्द्रस्य पत्नी)
३. रम्भा (मेनकायाः प्रियसखी)
४. उर्वशी (मेनकायाः सखी)
५. शकुन्तला
(मेनकाविश्वामित्रयोः दशदिवसीयशिशुरूपा आत्मजा)
६. प्रतीहारी (इन्द्रस्य द्वारपालिका)
७. प्रथमनटी
८. द्वितीयनटी
९. अन्याः अप्सरसः (इन्द्रस्य सभासदः)

—०—

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

डॉक्टर-हरिनारायणदीक्षितप्रणीतम्

मेनकाविश्वामित्रम्

।। प्रथमोऽङ्कः ।।

(जवनिका अपसरति; मञ्चे शनैः शनैः प्रकाशो वर्धते; मध्ये मुद्राविशेषे नटी-सूत्रधारौ नान्दीं मिथो गायन्तौ दृश्येते ।)

वन्दे गुरुं त्यक्ततनुं स्वकीयं
विद्याधरं सेवितशक्तिपादम् ।
कृपा यदीया प्रबलं करोति
मनोबलं मे सततं समाजे ।।१।।

वाचां च देवीं शिरसा नमामि
शब्दार्थयोः प्राञ्जलभावहेतोः ।
आशास्ति नूनं मयि सा प्रसन्ना
भूत्वाशु मद्-बुद्धिगता भवेच्च ।।२।।

गौरीसुतं विघ्नविनाशहेतुं
गजाननं सिद्धिकरं जनानाम् ।
साफल्यमाप्तुं रचनाकलायां
नमामि भक्त्या शिरसा नतेन ।।३।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतो मदीया मतिरल्पभावा
प्रयाति नम्रा प्रति कालिदासम् ।
शकुन्तला यस्य मनो मदीयं
चकार सोत्कण्ठमकुण्ठितं च ।।४।।

सामाजिका ये समुपागताश्च
नारी-नरा नाटकदर्शनोत्काः ।
तेभ्यो नमो वागथ याचना यद्
धैर्येण शान्त्या च विलोकयन्तु ।।५।।

(नान्द्यन्ते नटी-सूत्रधारौ स्वस्वसमीपवर्त्तिनि कोणे विलीयेते । ततश्च नटीकोणतः पूर्वसूत्रधारभिन्नरूपभूषः अपरः सूत्रधारः तथा सूत्रधारकोणतः पूर्वनटीभिन्नरूप-भूषा अपरा नटी मञ्चे प्रविशतः ।)

नटी (करौ सम्पुटीकृत्य शिरश्च ईषत् नम्रीविधाय)—आर्य ! अभिवादये ।

सत्रधारः (आशीर्वादमुद्रायां दक्षिणहस्तम् उत्थाप्य)—अनुकूलं पतिमाप्नुहि ।

नटी (सेषल्लज्जम्)—अहो मम भाग्यम् । अथ बोधयतु मां भवान् अद्य केन विधिना असंख्यानाम् एतेषां समवेतानां सोत्सुकानां सामाजिकानां सभ्यानां प्रेक्षकजनानां मनोरञ्जनं चिकीर्षति ?

सूत्रधारः स्थाने ते जिज्ञासा । वसन्तपञ्चमीमहोत्सवे समवेताः इमे सर्वे एव सामाजिकाः सुशिक्षिताः नूतनोत्साहसम्पन्नाः संवेदनशीलाश्च सन्तीति अहं जाने । किन्तु पुनरपि महाकविभास-कालिदास-भवभूति-हर्षवर्धनादिप्रणीतं रूप-कान्तरं परिहाय, अद्याहम्, अद्यावधि केनचिदपि अलिखितपूर्वम्, अश्रुतपूर्वम्, अपठितपूर्वम् अविलोकित-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वं च डॉक्टर-हरिनारायणदीक्षितविरचितं मेनका-विश्वामित्रं नाम अभिनवं नाटकम् अभिनीय एनानशेषान् सम्प्रसादयितुं समीहे । यतो हि—

मेनका नायिका तत्र विश्वामित्रश्च नायकः ।
मनोज्ञं नाटकं तद्धि देवेशः प्रतिनायकः ॥ ६ ॥

नटी आर्य ! शोभनः कल्पः । यतो हि—

अस्मिञ्जगति जनेभ्यो जायते रुचिकरो यथा रसालः ।
द्राक्षा तथा न तेभ्यो जानाति जनोऽयं सुतथ्यम् ॥ ७ ॥

सूत्रधारः साधूक्तं त्वया । अथाहं समीहे यद् यावदहं गत्वा नाटकारम्भं कारयामि, तावत् त्वं स्वकीयेन मधुरेण स्वरेण साम्प्रतिकं वासन्तिकं गीतं सनृत्यं समादाय सामाजिकानां हृदयावर्जनं विधेहि ।

नटी यथा आज्ञापयति आर्यः ।

(सूत्रधारो निष्क्राम्यति ; नटी सोत्साहं सहावभास-विलासं सनृत्यं च गायति ।)

समायाता प्रणयवेला प्रणयिनोः प्रीतिदा प्रेष्ठा ।
नियम-यम-पाशपीडायाः कृते सञ्जीवनीभूता ॥

धराया एष शृङ्गारः,
लतानामेष आकारः,
सुमानामेष विस्तारः,
द्विरेफाणां च गुञ्जारः ।

समे सञ्चारयन्त्याशु प्रणयियुगलेषु शृङ्गारम् ॥
समायाता प्रणयवेला प्रणयिनोः प्रीतिदा प्रेष्ठा ।
नियम-यम-पाशपीडायाः कृते सञ्जीवनीभूता ॥

कोकिलाः कलं कूजन्ति,
आम्रवनानि लसन्ति,
सुरभितवाता वान्ति,
तरुभिश्च लताः श्लिष्यन्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इमानि चारुचरितानि मनो मदयन्ति सर्वेषाम् ।।
समायाता प्रणयवेला प्रणयिनोः प्रीतिदा प्रेष्ठा ।
नियम-यम-पाशपीडायाः कृते सञ्जीवनीभूता ।।

नयनमदं प्रति प्रीतिः,
अधरसुधां प्रति सक्तिः,
विवृतमुरः प्रति वृत्तिः,
मदनस्य सेवने भक्तिः ।

मनसि विस्तारमायान्ति वसन्ते योगिनाञ्चापि ।।
समायाता प्रणयवेला प्रणयिनोः प्रीतिदा प्रेष्ठा ।
नियम-यम-पाशपीडायाः कृते सञ्जीवनीभूता ।। ८ ।।

(गीतावसाने नटी दर्शकाभिमुखी भूत्वा प्रणाममुद्रायां त्रिवारं नमति ; अस्मिन्नेव समये नेपथ्ये)

का अस्ति इयम् अपण्डिता केवलं कामपण्डिता ? या अतिघोरां तपस्यां सुचिरेण कालेन कुर्वतो महर्षेः विश्वामित्रस्य आश्रमतीरे एवं मदनं प्रशंसति ; योगं योगिराजं च समुपहसति ।

(नटी नेपथ्याभिमुखीभूत्वा श्रुतिमभिनीय प्रथमं विस्मयं तदनु च भयं नाटयति ।)

नटी हा, हन्त ! वासन्तिकवासनाभिभूतया मया विज्ञातमेव नहि यदनतिदूरे एव विश्वविश्रुतकोपस्य महर्षिविश्वामित्रस्य आश्रमपदम् । इदं मे सौभाग्यमेव यन्मम गीतं तत्कर्णविवरयोः नैव प्राप्तम् । अन्यथा प्रकुपितो भूत्वा सोऽवश्यमेव मां शप्तवान् भवेत् । अथ तु मया सत्वरं पलायितव्यम् ।

(सभयं द्रुतं पलायमाना निर्गच्छति ।)

।। इति प्रस्तावना ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(ततः आभ्यन्तरिकजवनिका अपसरति ; आश्रम-वातावरणयुते मञ्चे मध्ये बद्धपद्मासनो निमीलितनयनो महर्षिविश्वामित्रो दृश्यते ।)

विश्वामित्रः (क्षणानन्तरम्)—

चिदानन्दं सत्यं जगति गतिदं शर्मसदनं
निराकाराकारं विगुणसगुणं वन्द्यममलम् ।
निरीहं निर्द्वन्द्वं सकलमुनिमान्यं श्रुतिनुतं
परं ज्योतिर्वन्दे भवभयहरं सर्वशरणम् ॥ ९ ॥

शुभं सच्चित्सारं परमसुखसारं सुरसुखं
श्रुतीनां सर्वासां विधिहरिहराणां च लषितम् ।
समेषां शास्त्राणां चरमफलरूपं बुधनुतं
परं तत्त्वं जोऽहं निखिलनिलयं नौमि सततम् ॥१०॥

(स्वैरं शान्तं च नयनयुगलम् उन्मीलयति ।)
(ततः प्रविशन्ति कतिपये तपस्विनः ।)

प्रथमः महर्षिप्रवर ! प्रणमामि ।

विश्वामित्रः (तन्मुखं पश्यन् स्मयते ।)

द्वितीयः नमोऽस्ति ब्रह्मर्षये ।

विश्वामित्रः [तन्मुखं पश्यन् स्मयते ।]

तृतीयः तपसा जितसर्वाय प्राप्तब्रह्मर्षिपदाय श्रीविश्वामित्राय मे प्रणामाः सन्ति ।

विश्वामित्रः [एतन्मुखं सविशेषं पश्यन् स्मयमानश्च]—स्वागतं भवतां सर्वेषाम् । [दक्षिणहस्तेन आसनानि प्रति निर्दिशन्] तिष्ठन्तु भवन्तः ।

सर्वे तपस्विनो यथास्थानम् उपविशन्ति]

प्रथमः महर्षिवर ! अपि निष्प्रत्यूहं तपः ? कुतश्चित् काचिद् बाधा तु नास्ति ?

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वामित्रः अधुनावधि तु निष्प्रत्यूहमेव ।

द्वितीयः आशासे भाविकालेऽपि निष्प्रत्यूहमेव भविष्यति ।

तृतीयः कस्य शक्तिरस्ति ब्रह्मर्षेः विश्वामित्रस्य तपो बाधितुम् ? बाधमानं जनं ब्रह्मर्षिः भस्मसात् न करिष्यति ?

विश्वामित्रः साम्प्रतं ननु तप एव मम सर्वस्वम् । एतस्य रक्षां तु शक्तिमतिक्रम्यापि करिष्यामि ।

प्रथमः महातपोधनानां कृते देवराजवर्ज कस्माच्चिदपि तपोबाधा न सम्भवति । स एव स्वीयपदभङ्गभीरुतया कपटकूट-माश्रित्य तपसि विघ्नमुत्पादयितुं शक्नोति ।

द्वितीयः राक्षसान् कथं विस्मरति भवान् ? तेऽपि तु विघ्नकरा भवन्ति ।

प्रथमः राक्षसाः कपटं न कुर्वन्ति । ते तु प्रत्यक्षमागत्य विघ्नं कुर्वन्ति । अतः तत्कृतानां विघ्नानां विनाशोपायान् तपस्विनोऽपि कर्त्तुं प्रभवन्ति यैः पराभूता विफलप्रयासाः राक्षसाः न पुनः विघ्नोत्पादाय यतन्ते । किन्तु देवराजस्तु निगूढं बाधते । अत एव तत्कृता तपोबाधा प्रतीकारा-भावात् साफल्यमुपयाति ।

द्वितीयः देवराजस्य इयं प्रवृत्तिस्तु निन्दनीयास्ति ।

प्रथमः अस्ति तु निन्दनीया एव; किन्तु किं क्रियेत ?
(विश्वामित्रस्य मुखाकृतिः शनैः शनैः कठोरा भवितुम् आरभते ।)

द्वितीयः ब्रह्मर्षिप्रवरस्य विश्यामित्रस्य घोरेण तपसा सम्प्रति त्रिलोकी प्रभावितास्ति । अस्य अमोघेन तपोबलेन सर्वे एव सुपरिचिताः सन्ति । तस्मादहं मन्ये यन्न कोऽपि मानवो राक्षसो देवो वा अस्य तपसि विघ्नोत्पादाय साहसं विधास्यति ।

प्रथमः चौराः धनवतामेव धनं हरन्ति । इदानीं च त्रिलोक्यां महर्षिविश्वामित्र एव अद्वितीयस्तपोधनः । इन्द्रश्च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तपश्चौरः प्रसिद्ध एव । अत एव अहं ब्रवीमि यद् देवराजा-देव तपोविघ्नसम्भवः ।

विश्वामित्रः किन्तु तातप्रवर ! मया देवराजस्य किमपराद्धम् ? येन तस्य एतादृशे अकार्ये कार्ये प्रवृत्तिः आशङ्क्यते ?

प्रथमः ब्रह्मर्षिप्रवर ! भवता तस्य किमपि नापराद्धमस्ति किन्तु नित्यं प्रवर्धमानेन भावत्केन तपोबलेन भवत्सु देवराजत्व-योग्यतामाकलय्य स्वीयपदभङ्गभीरुतया सः कपटकूट-माश्रित्य भवतां तपसि विघ्नमुत्पादयितुं शक्नोति ।

विश्वामित्रः (विहस्य)—आं ज्ञातम् । परं नाहं देवराजो बुभूषामि । न वा तत्पदप्राप्तिहेतवे तपश्चरामि ।

प्रथमः इदन्तु अहं जानामि । किन्तु

तृतीयः (प्रथमम्)—ऋषिप्रवर ! अथ कृपया त्यजतु भवान् इमाम् उत्साहभञ्जिकीं स्ववाचां प्रवृत्तिं यज्ज्ञानार्थं च वयं समायाताः, तद्विषये उपक्रमं करोतु ।

विश्वामित्रः उचितम् उदीरितम् । कथ्यताम् ; का जिज्ञासा भवताम् ?

प्रथमः जगति किं तथ्यम् ? किं वा अतथ्यम् ? इत्येव ज्ञातुं समुत्सुकाः वयम् ।

विश्वामित्रः (क्षणं विचिन्त्य)—श्रूयताम्

असारः संसारो नहि किमपि तथ्यं जडभवे
मुधा बन्धो लीनोऽसि भवसि च दीनो हतमतिः ।
सदानन्दं सत्यं परमसुखसारं सुरसुखं
परं ज्योतिर्ब्रह्म समुपचर भद्राय सततम् ॥११॥

(प्रथमं प्रति)

किं वा भवान् मन्यते ?

प्रथमः भगवन् ! भवत्कल्पं विकल्पयितुं न मे प्रवृत्तिः ; न वा मयि शक्तिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तृतीयः साधु ज्ञातं भवता । सम्प्रति निर्भ्रान्तं मे मनः ।

द्वतीयः ममापि मतिभ्रमो नष्टः भवदुपदेशं पालयितास्मि ।

प्रथमः (आकाशं पश्चिमाशां च विलोक्य कराञ्जलिं कुर्वन्) भगवन् ! भवद्दर्शनेन पुण्यवन्तो भूताः वयम् ; आध्यात्मिकसंशयोपि अस्माकं छिन्नः । अथात्रभवान् अस्मान् गन्तुमनुजानातु ।

विश्वामित्रः नहि, नहि । भवन्तोऽद्य मम अतिथयः सन्ति । अतोद्यतनीं निशीथिनीम् अत्रैव पार्श्ववर्त्तिनि पर्णकुटीरे अतिवाह्य श्वो गन्तुमर्हन्ति भवन्तः ।

सर्वे (एकस्वरेण)—यथा आज्ञापयति भवान् ।

विश्वामित्रः (नेपथ्याभिमुखम्)—देवल ! देवल !
(एकस्मात्कोणाद् देवलः प्रविशति ।)

देवलः (साञ्जलिः)—आज्ञापयतु गुरुदेव ।

विश्वामित्रः (समायातान् ऋषीन् हस्तेन निर्दिशन्)—देवल पश्य; इमे सर्वे अस्माकमतिथयः सन्ति । एषां कृते सुव्यवस्था विधियताम् ।

देवलः यथाज्ञापयति गुरुदेवः (सर्वान् प्रति सादरम्) आगच्छन्तु भवन्तः ।

(त्रयोऽपि तपस्विनः उत्थाय विश्वामित्रं च प्रणम्य निर्यान्ति । विश्वामित्रश्च 'अहं सच्चित्साम्' इत्यादि क्रमेण मन्दं मन्दतरञ्च उच्चारयन् भूयः समाधिष्ठो भवति । ततः आभ्यन्तरिकजवनिका पतति ।)

(नेपथ्ये ईषद्दूरस्थेव समवेतस्वरलहरी समुद्भवति ।)

जय कुशिकपौत्र । जय गाधितनय ।
कुरु कृपादृशं परिपाहि भुवम् ॥

[ततश्चत्वारो भद्रजनाः 'जय कुशिकपौत्र । जय गाधितनय' इति गायन्तो मञ्चे प्रविशन्ति ।)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सर्वे (पर्यायेण एकैकां गीतिपङ्क्तिं गायन्तः)—

जय राजर्षे ! जय ब्रह्मर्षे !
जय तपोलीन ! जय ब्रह्मलीन !
जय जितक्रोध ! जय लब्धबोध !
जय विजितकाम ! जय निखिलधाम !

(सर्वे मिलित्वा)

जय कुशिकपौत्र । जय गाधितनय ।
कुरु कृपादृशं परिपाहि भुवम् ।।

(पुनः पर्यायेण एकैकां पङ्क्तिं गायन्तः)

भवता रचिता नूत्ना सृष्टिः
शप्तस्य त्रिशङ्कोश्चापीष्टिः ।
व्याधस्य मतङ्गस्योत्कृष्टिः
क्रियतामस्मासु दयादृष्टिः ।।

(पुनः सर्वे मिलित्वा)

जय कुशिकपौत्र ! जय गाधितनय !
कुरु कृपादृशं परिपाहि भुवम् ।।

(पुनः पर्यायेय एकैकां पङ्क्तिं गायन्तः
ममुजेषु न कोऽषि समो भवता
अनुरेषु न कोऽपि समो भवता ।
न सुरेषु च कोऽपि समो भवता।
भवता तपसा विजिताः सर्वे ।।

(पुनः सर्वे मिलित्वा)

जय कुशिकपौत्र जय गाधितनय ।
कुरु कृपादृशं परिपाहि भुवम् ।।१२।।

(इति गायन्त एव निष्क्राम्यन्ति ; ततश्च आभ्यन्तर-जवनिका उत्तिष्ठति ; मञ्चे दिव्ये वातावरणे इन्द्रसभा शोभमाना दृष्टिपथम् आयाति ; मध्ये भव्यतमे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनुपमे आसने शचीसमेतो देवराजः इन्द्रो विराजमानोऽस्ति ; उभयतश्च तं यथास्तरम् अन्ये देवाः अप्सरसश्च भव्येषु आसनेषु शोभमानाः सन्ति ।

इन्द्रः (सर्वतो विलोकयन्)—भो भोः सुरगणाः । मन्ये भवन्तो वीतचिन्ताः सन्तोऽत्र नैजं नैजं पुण्यजनितं दिव्यं सुखं स्वदन्तेतमाम् ?

अनेके देवाः कृपा कल्पते भवताम् ।

इन्द्रः (सर्वतो निपुणं निरीक्षमाणः) देवगणाः । अग्निवायू न दृश्येते; इमौ कुत्र विद्येते ?

सोमदेवः (उत्थाय)—अद्य भूलोके तपतां वरस्य ब्रह्मर्षिप्रवरस्य गाधितनयस्य विश्वामित्रस्य परमपावने आश्रमे अतिथियज्ञः प्रवर्तते । तत्र पाकक्रियासौविध्यप्रादानाय अग्निदेवः स्वयमुपगतोऽस्ति ।

इन्द्रः (ईषद् उन्मनाः भवन्)—अथ च वायुः क्व गतोऽस्ति ?

सोमदेवः भगवन् ! वायुदेवस्तु अग्निसखो विख्यात एव । अनुक्तोऽपि सः स्वस्यसख्युः कर्मणि सहायको भवति । अतः सोऽपि तत्रैव अनुमेयः ।

इन्द्रः माम् अनापृच्छ्य भूलोकवासिनं तपस्विनं प्रति अनयोरयं भक्तिभावो मह्यं मनागपि न रोचते । (इन्द्रः सचिन्तो भवति । सोमदेवः आसनमधितिष्ठति ।)

शची (स्मयमाना इन्द्रग्रीवायां वामेतरां भुजलतां विनिवेश्य तदभिमुखी च भूत्वा)—हृदयवल्लभ ! किमेवं मुधैव ताम्यसि ? केवलं मनोरञ्जनार्थमेव समायोजितायाम् अस्यां सुरसमज्यायां यदि कोऽपि हृदयहीनो नायाति, तर्हि तदर्थं चिन्ता कथम् ? अतो विस्मर तदनुपस्थितिम् आज्ञापय मेनकायाः मनोरञ्जकं मन्मथोद्दीपकं च

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नृत्यारम्भम् ; सफलय च समवेतसकलसुरसभाभिलाषम् ।

सर्वे देवाः शचीदेवी समयोचितमाह । प्रसीदतु अत्रभवान् ।

इन्द्रः (दक्षिणपाणिं समुद्यम्य सोल्लासेम्) —समीचीनं समीचीनम् । एवमेव भवतु । (मेनकामभिलक्ष्य) हञ्जे मेनके । सम्पूरय सर्वेषामेषामभिलाषम् ।

(मेनका सोत्साहमुत्तिष्ठति ; मध्येमञ्चम् आगच्छति इन्द्राभिमुखी भूत्वा तं सादरं प्रणम्य सनृत्यं गायति ।)

मेनका संसारोऽयं भोगमयो, नहि योगमयो नहि योगमयः ;
नहि योगमयो नहि योगमयः ।
भोगेषु रतो ननु लोकोऽयं, लभते शान्तिं सुखशर्ममयः ;
लभते शान्तिं सुखशर्ममयः ॥

नारी भोगस्य गतिः परमा, न विदन्ति जनाः नहि ते सुधियः ; न विदन्ति जनाः नहि ते सुधियः ;
नारीञ्च विना नहि लोकगतिः, भ्रमतीव मनो नहि क्वापि रतिः ; भ्रमतीव मनो नहि क्वापि रतिः ॥

नारी सुखधाम मता लोके, नारीह तरी भववारिनिधौ ;
नारीह तरी भववारिनिधौ ।
नारीसहिताः जीवन्ति सुखं. नारीरहिताः भस्त्रायन्ते ;
नारीरहिताः भस्त्रायन्ते ॥

सर्वाणि सुखानि निरर्थानि, नारी यदि नास्त्युपभोगाय ;
नारी यदि नास्त्युपभोगाय ।
तस्मान्नारीं भज प्रेमयुतः, कल्पस्व च योगक्षेमाय ;
कल्पस्व च योगक्षेमाय ॥ १३ ॥

शचीन्द्रौ (सहस्ततालम्) —रम्यं मेनके ! अतिरम्यम् ।

देवगणः साधु मेनके ! साधु ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अप्सरसः (सहस्ततालम्) साधु सखि ! साधु । अतिहृद्या ते प्रस्तुतिः ।

(मेनका गीतिपद्धानि विहाय स्वीयान् अशेषान् लास्य-विलासान् प्रदर्शयितुम् उपक्रमते ।)

(नेपथ्ये मन्दं मन्दम्)

श्रीमन्नारायण, नारायण, नारायण ।
श्रीमन्नारायण, नारायण, नारायण ॥

वन्दे नारायण, नारायण, नारायण ।
वन्दे नारायण, नारायण, नारायण ॥

ब्रूहि नारायण, नारायण, नारायण ।
ब्रूहि नारायण, नारायण, नारायण ॥ १४ ॥

[ततः 'श्रीमन्नारायण, नारायण, नारायण' इति गायन् महतीहस्तो नारदः प्रविशति । सर्वे ससंभ्रमं बद्धाञ्जलयः समुत्तिष्ठन्ति । मेनकापि लास्याद् विरम्य नतशिराः साञ्जलिश्च तिष्ठति ।]

इन्द्रः [नारदं प्रत्युपगम्य प्रणाममुद्रायाम्]—ब्रह्मपुत्राय देवर्षये नमस्करोमि ।

नारदः विजयतां देवराजः विजयताम् ।

इन्द्रः [निजासनं निकषा स्थितम् एकं भव्यम् आसनं निर्दिशन्] भगवन् ! आगच्छतु, इदम् आसनम् अलङ्करोतु ।

[नारदे आसनासीने सति सर्वे नारदेन्द्रसंवादं श्रोतुकामाः स्वीये स्वीये आसने पुनरासते ।

नारदः देवराज ! अपि कुशली भवान् ?

इन्द्रः भवत्कृपया कुशलमेव । भवान् कथयतु ; इदानीं कुतः ?

नारदः इदानीं तु भूलोकात् समागच्छन्नस्मि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इन्द्रः [किञ्चिद् विचार्य]—श्रूयते यद् भूलोके राजर्षिः विश्वामित्रः अतिदारुणं तपस्तपन्नस्ति । अपीदं वृत्तं सत्यम् ?

नारदः नितान्तं सत्यं वृत्तमिदम् । सम्प्रति तत्सकाशादेव समायातोऽस्मि । भास्वन्तमिव भासमानं विलक्षण-तपोराशिपरिपूतं तदीयं शरीरं चारु चरितं च दर्शं दर्शं मामकं चित्तम् अधुनापि समाचामति वाचामगोचरं कमप्यमन्दमानन्दसन्दोहम् । भावत्कौ अग्निवायू अपि अद्य तं सेवमानौ आस्ताम् । एतेन स्फुटं भवति यत्स महर्षिरिदानीं सुराणामपि सेव्यतां सम्प्राप्तोऽस्ति ।

[इन्द्रः सचिन्तो भवति ; तदानीमेव अग्निवायू मञ्चे प्रविशतः ।]

अग्निः [साञ्जलिः] —प्रणमामि देवराज ! [नारदं विलोक्य] देवर्षे ! प्रणमामि ।

वायुः [साञ्जलिः]—देवराज ! प्रणमामि । [नारदं प्रति] देवर्षे ! प्रणमामि ।

[इन्द्रस्तूष्णीमास्ते ; नारदः स्मयमानः 'नारायण'-'नारायण' इत्युदीरयति ।

नारदः देवराज ! इमौ भावत्कौ अग्निवायू समागतौ । महर्षि-विश्वामित्रविषये एनौ पृष्ट्वा बहु ज्ञातुमर्हति भवान् अथाहं चलामि ; अनुजानातु भवान् ।

[नारदः उत्तिष्ठति ; तत्सम्माने देवराजादयः सर्वे उत्तिष्ठन्ति ।]

इन्द्रः भगवन् ! भूयः शीघ्रमेव अनुग्राह्योऽस्मि ।

नारदः (सस्मितम्) अवसरविशेषे अवश्यमायास्यामि ।
(सर्वे साञ्जलयो भवन्ति ; नारदः 'श्रीमन्नारायण, नारायण, नारायण' इति कीर्त्तयन् निर्गच्छति । तस्मिन् निर्गते पुनः सर्वे आसनासीनाः भवन्ति ।)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इन्द्रः (मेनकामुद्दिश्य)—हञ्जे मेनके ! तव कला नितरां चित्तचुम्बिनीति न मे संशयः । सर्वेषां पारिषद्यानां पक्षादहं ते साधुवादान् वितरामि ।

मेनकाः (साञ्जलिः शिरो नम्रीविधाय)--अनुग्रहाय कृतज्ञास्मि ।

इन्द्रः (पारिषद्यान् प्रति)—मन्ये, अनेन मनोरञ्जनेन आयोजनेन प्रीतिमापन्नाः भवेयुर्भवन्तः । अथ समाप्यते इयं सभा ; साधयन्तु भवन्तोऽभीष्टविलासलाभाय ।

(सर्वे उत्थाय निर्गच्छन्ति । जवनिका पतति ।)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

।। द्वितीयोऽङ्कः ।।

(जवनिका शनैः शनैरपसरति ; स्तरानुरूपे भव्ये वातावरणे मञ्चमध्ये आसन्दीमधिष्ठितः सचिन्त इव देवराजो दृश्यते । तदानीमेव अग्निवायू प्रविशतः ।)

अग्निः (अभिवादमुद्रायाम्)—देवराज ! प्रणमामि ।

वायुः (तथैव)—प्रणमामि देवराज !

इन्द्रः (उभौ विलोक्य)—आगम्यताम् ; आगम्यताम् ; स्वागतं भवतोर्द्वयोः । (एकम् आसनं निर्दिशन्) अग्ने ! इहास्ताम (अपरम् आसनं निर्दिशन्) वायो ! भवता इहास्यताम् ।

(उभौ यथास्थानम् उपविशतः ।)

अग्निः अद्य असमये एव भवता अहं समाहूतोऽस्मि । आज्ञापयतु, को नियोगोऽनुष्ठेयोऽस्ति ?

इन्द्रः अग्ने ! भवान् माम् अनापृच्छ्य यदा-कदा वायुसखो भूत्वा भूलोके विश्वामित्रं सेवते । 'किमत्र कारणम्' इत्येव ज्ञातुं मयाद्य अकाले एव भवन्तौ समाहूतौ ।

(अग्निवायू परस्परं पश्यतः ।)

इन्द्रः (उभौ विलोक्य) निस्सङ्कोचमुदीर्यताम् ; तथ्यन्तु रिपोरपि ग्राह्यम् ; भवन्तौ तु आत्मीयौ स्तः ।

अग्निः (साञ्जलिः) अभयं तावत्प्रथमं ददातु भवान् । ततोऽहं वक्तुं यतिष्ये ।

इन्द्रः अभयमस्तु ।

अग्निः भगवन् ! भूलोके भूयानेष जनानामाशयो यतः शीघ्रमेव तपतां वरो महर्षिर्विश्वामित्रः स्वीयेन सर्वलोकातिशायिना

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तपोबलेन अमरलोकाधिपत्यमप्यधिगमिष्यति । अहमपि ततो महिष्ठं वसिष्ठमपि तपसातिशयानं तं तपोनिष्ठं साक्षादनुवीक्ष्य 'नहि निर्मूला जनश्रुतिः' इत्याप्तोक्तिञ्च संस्मृत्य तस्यां जनोक्तौ च विश्वस्य भाविकल्याणाशया तत्सेवायां प्रवृत्तोऽभवम् । एष वायुरपि मम सख्यवशीभूतो मामन्वसरत् ।

वायुः [सत्वरम्] किन्तु देवाधिदेव ! भवन्तं प्रति आवयोः हृदये श्रद्धा यथापूर्वं विद्यते । तस्यां न मनागपि कार्श्यं सम्भावनीयं भवतेति सादरं प्रार्थ्यते ।

[इन्द्रो गम्भीरो भवति]

इन्द्रः [किमपि विचिन्त्य]—किन्तु अग्ने । भवता इदं मदनिष्टगर्भं वृत्तं मह्यं कथं नैव निवेदितम् ?

अग्निः भगवन् महर्षिविश्वामित्रभयादेव नेव निवेदयितुम् अशक्नुवम् ।

वायुः आं देवराज । विदितरहस्यो महर्षिर्विश्वामित्रो ध्रुवमेव दुस्सहं शापं दद्यात् ।

अग्निः भगवन् । एतदेव अनावेदनकारणम् ।

इन्द्रः [सशिरःकम्पम्] आं ज्ञातम् । [किञ्चद् विचार्य] अग्ने ! वायो ! भवद्भ्यो साधुवादाः ; यतो हि भवद्भ्यां सत्यमुदीरितम् । अहं प्रसन्नोऽस्मि । अथ सहर्षं गम्यतां दिव्यलोकसुखोपभोगाय ।

अग्निवायू [साञ्जली सशिरोनती च]—यदाज्ञापयति देवराजः ।

(उभौ निष्क्रान्तौ । ततः प्रविशति पारिजातपुष्पपाणिः शची ।)

शची जयतु आर्यपुत्रो जयतु ।

इन्द्रः [शचीमालोक्य] – आगम्यतां प्राणप्रिये । आगम्यताम् [निजासन एव स्थानं निर्दिशन्] इहास्यताम् ।

[शुचिस्मिता शची तत्रैवागत्य समुपविशति ।]

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शची आर्यपुत्र। भवन्तमधुना चिन्तया चुम्ब्यमानमिव पश्यामि निशायामपि भवान् अनया चिन्तया एव आलिङ्ग्यमान आसीत्। [इन्द्रस्य ग्रीवायां स्वभुजलते विधाय] अपि मया किमपि अपराद्धं प्राणेश !

इन्द्रः नहि नहि मम प्राणवल्लभे ! एवं वैव ब्रूहि।

[शचीभालं परिचुम्बति।]

शची तर्हि पुनश्चिन्तेयं कुतः ?

इन्द्रः कथयामि त्वामशेषम्। शृणु—

विश्वामित्रो मुनिर्भूमौ दुश्चरं कुरुते तपः।
अर्हताञ्चाप्नुवन्नस्ति देवराजत्वदायिकाम् ॥१॥
अग्निना वायुना चापि निगूढं सेवितो हि सः।
सन्तापयति मां देवि समायातं महाभयम् ॥२॥

शची [ससाध्वसं देवराजं समाश्लिष्यन्ती]—प्राणवल्लभ! यदि एवमस्ति तर्हि आवयोः कृते तु महदनिष्टं सम्पत्स्यते।

इन्द्रः आम् देवि ! यदि तदीयं तपः पूर्णतां याति; तर्हि आवयोः पदावनतिः सुनिश्चिता एव।

शची [आश्लेषं विहाय इन्द्रास्यमीक्षमाणा] तर्हि एतदनिष्ट-निवारणाय कश्चिदुपायो विधेयो भवता।

इन्द्रः प्रियतमे ! तमेव चिन्तयामि।

शची सत्वरं निश्चीयताम्।
रोगो रिपुस्तथा वह्निश्शमनीयः सत्वरं सदा।
उपेक्षिता भवन्त्येते दुर्दम्या बलवतामपि ॥३॥

इन्द्रः जानामि प्रियतमे ! अत एव तु यतः प्रभृति इदं वृत्तं ज्ञातम्, ततः प्रभृत्येव तत्तपोबलविनाशाय कमपि उपायं चिन्तयन्नस्मि।

शची प्राणेश ! पुरुषाणां तपोबलविनाशने मनोरमा रामा अमोघो रामबाणः। सौभाग्येन च भवत्सविधे एतादृ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शानां बाणानां वैपुल्यम् । कथन्तर्हि चिरयति ? विचारयति च?

इन्द्रः (सोत्साहम्)—देवि ! मन्त्रणा ते वरीयसी । ममापीयं धारणा । किञ्चेयं विचारणा, यद् विजितेन्द्रियस्यतस्य ब्रह्मर्षेः मनोमोहने असमर्था सती विदितरहस्या च भूत्वा काचिद् वराकी सुलभकोपेन तेन महर्षिणा दत्तशापा दुर्गतिं नाधिगच्छेत् ।

शची (सस्मितम्)— किन्तु रामबाणस्तु अमोघो भवति ।

इन्द्रः आम् । इदन्तु सत्यम् ।

शची (सोत्साहम्)—तर्हि सत्वरं प्रयुज्यताम् ।

इन्द्रः (सस्मितम्) –उचितमस्ति; एवमेवास्तु। (ईषद् विचार्य) अस्मै मेनका कीदृशी ?

शची (सस्मितम्)—श्लाध्यतमा ; महारिपौ महास्त्रमेव वरम् ।

(उभौ स्मयमानौ सानन्दम् अन्योन्यम् आश्लिष्यतः । वाह्यजवनिका पतति । द्वितीयस्मिन् क्षणे नेपथ्ये वीणाध्वनिलहरीमाधुरी क्रमेण व्याप्नोति । ततो जवनिका अपसरति ; तथा लोचकलोचनातिथीभवति सुरम्यमासनमधिष्ठिता वीणां वादयन्ती गायन्ती च मध्येमञ्चं मेनका ।)

अयि मानिनि । मानं मुञ्च प्रिये ।।
मुग्धा असि, जानासि नहि त्वं मधुमासं रतिवेगकरम् ।
प्रीतिविधानप्रेरणापूरं रत्यालम्बनहीनतुदम् ।।
अयि मानिनि ! मानं मुञ्च प्रिये ।।
अस्य वशे सकलो लोकोऽयं माद्यति हृष्यति विना ह्रियम् ।
गायति नृत्यति वाञ्छति भूयो भूयः कामसुखं च प्रियम् ।।
अयि मानिनि ! मानं मुञ्च प्रिये ।।
कामयते भ्रमरी भ्रमरं हरिणी हरिणं च पिकी च पिकम् ।
हंसी हंसं रतिवेगवती रमणी रमणं च मनोरमणम् ।।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अयि ! मानिनि ! मानं मुञ्च प्रिये ॥
गत्वा मानय प्रियं स्वकीयं मा भूत्सोऽन्यमनाः मुग्धे ।
मा नैराश्यशिला पतिता भूत्प्रीतिलतायामविदग्धे ॥
तन्मानिनि ! मानं मुञ्च प्रिये ॥४॥

(शचीन्द्रौ प्रविशतः)

इन्द्रः (सपाणितालम्)—रम्यं मेनके रम्यम् । अतिहृद्यं ते गीतमिदम् । मुग्धानां नायिकानां कृते तु शिक्षकायमाणमेतत् ।

(शचीन्द्रौ सम्मुखं दृष्ट्वा मेनकाया गानध्यानं नश्यति ; वीणामेकतो निधाय सत्वरं सोल्लासं च सा आसनं विहाय इन्द्रचरणयोः प्रणमति ।)

शची साधु सखि मेनके ! साधु । वासन्तिकः प्रभावः साधु सन्दर्शितस्त्वया ।

(मेनका सचीं प्रणमति ।)

मेनका (साञ्जलिः)—देवराज ! भवतोरद्य हृदयेन स्वागतं करोमि—

दिवस एष ममाद्य शुभान्वितः
सफलमस्ति जनुर्ननु मामकम् ।
चरणपङ्कजरेणुरयं यतः
पतति पापहरो हि ममालये ॥५॥

(युगलासनं निर्दिशन्ती)

आगच्छताम् ; इदमासनम् अलङ्करुताम् ।

शचीन्द्रौ सहर्षं तत्र तिष्ठतः । मेनका सोल्लासम् एकैकां परिजातपुष्पमालां तयोः कण्ठहारीकरोति । तौ आनन्दमनुभवतः ।)

शचीन्द्रौ मेनके ! त्वमपि सुखेन तिष्ठ । येन त्वया सह वार्तारसपिपासा आवयोरुपशाम्येत ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनका यदाज्ञापयति देवराजः (सलीलं सविनयञ्चोपविश्य) देवाधिदेव ! अद्य सायन्तनं विहारमपहाय दासीगृहागमनं भवतोः किन्निमित्तमिति जिज्ञासते मे मनः ।

इन्द्रः मेनके ! आसन्नसङ्कटे विहारे कथङ्कारं रमेवहि ?

मेनका (सविस्मयम्(— भवतोर्विहारः आसन्नसङ्कटः ? (पुनः दृढतापूर्वकम्) असम्भाव्यमेतम् ।

इन्द्रः नहि मेनके ! मम वचस्तथ्यम् ।

मेनका (सदुःखम्)—कथं कुतश्चेदमप्रियं स्वामिन् ?

इन्द्रः भूलोके दुश्चरं तपश्चरन् महर्षिविश्वामित्रो मदीयपदयोग्यतां प्राप्तप्रायः । तत एव पदापहारशङ्कया अहं परमां पीडामनुभवामि । (विषण्णो भवति ।)

मेनका हा ! इदं तु महाकष्टमापतितम् । (अधोवदना दुःखमनुभवति ।)

शची (उत्थाय मेनकापृष्ठे पाणिं निधाय) – सखि ! मेनके ! त्वं तु धीरासि ; अधीरा मा भूः । अपरञ्च अस्मान्महाभयसागरात् आवयोः समुद्धरणे ननु त्वमेव नौकायितुं शक्नोषि ।

मेनका (शचीं पश्यन्ती) —कथङ्कारं देवि ?

(शची इन्द्रं पश्यति ।)

इन्द्रः मेनके ! त्वं त्रिलोकीललनाललामभूतासि, इत्यत्र नावयोः संशीतिः । (मेनका ह्रियं नाटयति ।) तावकी श्रद्धापि चावयोरनुपमा । अत एव आवामभिलषावो यत् त्वं स्वीयेन रूपमाधुरीमदेन निजतनुतालालित्येन च तं महर्षि मदयित्वा तपसो विरतं विधाय स्वस्यामनुरक्तं विधेहि । येन तपोभङ्गदोषात् तदीया देवराजत्वयोग्यता लुम्पेत् । आवयोश्च ततो भीतिर्नश्येत् ।

शचीः (मेनकामुत्साहयन्ती) – आम् मेनके ! तव कृते इदं सर्वं नितान्तं सुकरम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(मेनका चिन्तां नाटयति । शचीन्द्रौ तदुत्तरं प्रतीक्षेते ।)

इन्द्रः मेनके ! किं चिन्तयितुं प्रवृत्ता ?

मेनका (साञ्जलिः)—स्वामिन् ! महर्षिविश्वामित्रस्य मनोबलं विश्वविदितम् ! आत्मपराभवम् असहमानः सः किञ्चिदपि कर्त्तुं प्रवृत्तो भवति ; तत्र तपोबलेन साफल्यमपि प्राप्नोति । प्रकुपितो भूत्वा महानिष्टं करोति सः स्वीयस्य कोपपात्रस्य । अतोऽहं भवदादेशानुपालने भीतिमनुभवामि ।

इन्द्रः मेनके ! मा भैषीः । अहं प्रत्येमि यत् त्वन्मुख-कमलावलोकनसमकालमेव तन्मनो नूनं मिलिन्दायिष्यते । अतस्तत्कोपोद्गमावसर एव नायास्यति ।

शची नात्र संशयः—

त्वदीयां तन्वाभां विजितरतिशोभामयि सखि
विलोक्यासौ नूनं परिहृततपास्त्वामसुलभाम् ।
अधीरोऽसौ भूत्वा सुतनु नियतं साञ्जलिपुटः
सपर्यां ते कर्त्ता स्वयमुपहरन्वाचममलाम् ॥ ६ ॥

मेनका मम तु मनागपि नात्र प्रत्ययः । यतोहि अहं जाने यत्—

तरति बाहुबलेन स वारिधिं
भजति केसरिणीं पयईप्सया ।
श्रयति नागनृपं मणिलब्धये
भवति गाधिसुतेच्छकृच्च यः ॥ ७ ॥

अतएव च विश्वामित्रवशीकरणे आत्मानम् अक्षमां मन्यमानां मां क्षमतां देवराज !

इन्द्रः (सानुनयम्)—मेनके !

न खड्गं न पाशं न बाणं न वज्रं
न वा सैन्यशक्तिं
अहं क्वापि पश्यामि लोके जयेद् यः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सुरम्यं सुरामाबलञ्चाद्वितीयम् ॥ ८ ॥

अतोऽहं निस्संशयं ब्रवीमि यत् सकामां समीपे समुपसृतां त्वां तिरस्कर्त्तुं स न प्रभविष्यति ; अपितु स्वयमपि सकामो भविष्यति ।

(मेनका किङ्कर्त्तव्यविमूढा भवति ।)

शची (सस्नेहम्)—मेनके ! त्वं मे सखीषु मूर्धन्यतमासि । मनसि महतीमाशां निधाय समायातौ आवाम् ; निराशौ मा कार्षीः ।

इन्द्रः (मेनकायाः पादयोः पतित्वा)—मेनके ! मदीयपदरक्षा सम्प्रति त्वयैव सुकरा । रक्ष मां दुस्तरादस्माद् संकट-सागरात् ,

मेनका (ससम्भ्रमं देवराजं स्वभुजलताभ्याम् उत्थापयति स्वयं च तच्चरणयोः शिरो निधाय)- स्वामिन् ! देवाधिदेव ! अहन्तु भवतः कृपाक्रीता दासी । एवं विधाय मा मामपराधिनीं लज्जितां च विदधातु देवेश ! यदाज्ञापयति भवान्, तत्प्राणार्पणेनापि साधयिष्यति भवतो मेनका ।

इन्द्रः (सप्रमोदम्)- साधु मेनके ! साधु । अनुरूपमेव उदीरितं त्वया ; सम्प्रति सिद्धप्रायं मे समीहितम् । (ततो भावविशेषेण संवलितीभूय सरभसं मेनकां समाश्लिष्यन् सगद्गदपदम्) मेनके ! तवैतम् अनुग्रहं न कदापि विस्मरिष्यामि ।

(मेनका आनन्दमनुभवति ; शची स्मयते ।)

मेनका (प्रकृतिस्था भूत्वा)—अथैका प्रार्थना स्वामिन् !

इन्द्रः कथ्यतां वरवर्णिनि !

मेनका कामो मधुस्तथा वायुः

इन्द्रः आनुकूल्यं भजन्तु ते ॥ ९ ॥

मेनका इदमेव वाञ्छामि भगवन् !

इन्द्रः एवमेव भविष्यति ।

शची (मेनकायाः करौ गृह्णती)—सखि ! मेनके ! उद्धृतं त्वया नौ विषादशल्यम् । सदाहं ते कृतज्ञा भविष्यामि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनका देवि ! भूलोकं प्रस्थिता नाहं विस्मरणीयेति मे कामः ।
(शचीस्कन्धे मुखं निधाय वियोगवेदनामनुभवति ।)

शची (मेनकायाः शिरसि समाघ्राय)—सखि ! किमेवं कातरासि ? स्वप्नेऽपि त्वां न विस्मरिष्यामि ।

इन्द्रः (मेनकाया वामस्कन्धं परामृशन्)—आं मेनके ! इदं सत्यं जानीहि ।

(जवनिका पतति ।)

(नेपथ्यं)

अतिकठोरमनाः मुनिकौशिकः
क्व; मृदुला महिला क्व च मेनका ।
अथ विलोकय वास्तविकं बलं
वसति रूपनिधावुत तापसे ॥१०॥

॥ इति द्वितीयोऽङ्कः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

।। तृतीयोऽङ्कः ।।

(जवनिका उत्तिष्ठति ; एकस्मात्कोणात् क्रमेण वायुः मेनका कामो मधुश्च गतिं नाटयन्तो मञ्चे प्रविशन्ति ।)

मेनका वायुदेव ! एते वयं स्वर्गलोकमपहाय भुलोकन्तु अवतीर्णाः । अथ बोधयतु भवान् कियति दूरे महर्षि-विश्वामित्रस्य आश्रमः ?

वायुः अधुना अनतिदूरमेव आस्ते ।

मेनका शोभनम् ।

कामः वायो ! मन्ये, देवी मेनका मार्गश्रमश्रान्तास्ति । तत्कस्याञ्चिद् वृक्षच्छायायाम् अवस्थाय श्रमापनोदो विधेयः ।

मधुः आं वायुदेव ! सख्या सम्यगुपलक्षितम् । क्वचिद् विश्रामो विधातव्य एव ।

मेनका नहि, नहि । गन्तव्यं प्राप्यैव विश्रामविधानं वरं मन्ये ।

वायुः देवि ! गन्तव्यन्तु भवती आगतप्रायमेव अवगच्छतु । अतएव भवतां सर्वेषां मन्तव्यानुसारेण अहमपि विश्रमावसरं समुपस्थितं मन्ये । तद् आगच्छन्तु भवन्तः ; (अङ्गुल्या निर्दिश्य) अस्य महीरुहस्य सघनच्छायायां समुपविश्य श्रमापनोदं कुर्याम ।

मेनका यदि सर्वेषामेव इयं समीहा, तर्हि एवमेवास्तु ।
(सर्वे इतस्ततः किञ्चित् परिक्रम्य यथास्थानम् उपविशन्ति ।)

मेनका सखायः ! यतोहि महर्षिविश्वामित्रस्य आश्रमपदं समीपे एव विद्यते । तदहं विचारयामि यद् मत्साहाय्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

माचरितुम् आगच्छन्तो भवन्तः इदानीमेव विदितकर्त्तव्या भवन्तु। येन समायाते अवसरे भवतामन्यतमेनापि काचिदपि स्खलतिर्न विधीयेत।

कामः देवि ! मेनके ! विश्वामित्रवशीकरणार्थं क्रियमाणेऽस्मिन् अभियाने ननु भवती एव सैनापत्यं बिभर्ति। अतो भवती एव निर्दिशतु यदस्मासु केन कदा किं करणीयं भविष्यति।

वायुः आं दवि ! कामदेवस्तथ्यमाह। भवती यं यं निर्देशं दास्यति, तं तं वयं करिष्याम,।

मेनका (सस्मितम्)—भवतामयमनुग्रहः।

(मेनका कर्त्तव्यचिन्तनं नाटयति।)

कामः (जनान्तिकम्)—वायुदेव ! सखे ! वसन्त ! पश्यतां भवन्तौ ; मेनकायाः इयं चिन्तनमुद्रा कियती रमणीयास्ति—

नतोन्नते भ्रूलतिके नयने किनीनिकाचुम्बितकोणे।
पुलकाञ्चितौ कपोलौ हृद्यं किन्न विचिन्तयन्त्याः ॥१॥ ?

वायुः (मेनकां निपुणं निरीक्ष्य)—सखे ! साधु समीरितं भवता। भूयश्च—

न केवलं यौवनचारुतायां
प्राप्ता प्रसिद्धिं सुरकामिनीयम्।
विचार्य कार्येऽपि सुचिन्त्य चोक्तौ
नान्या मता काप्यनया समाना ॥ २ ॥

कामः अतएव तु प्रेष्ठेयं देवराजस्य।

मधुः सखे ! काम ! अहन्तु मन्ये यत्—

अस्याः रूपजलेऽगाधे नेत्रभ्रमरसंकुले।
गाधिपुत्रमनोनौका नूनं मग्ना भविष्यति ॥ ३ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कामः आं सखे ! ममापि एष एव विचारः ।

मधुः मन्ये देवराजस्यापि एषैव धारणा स्यात् ।

कामः भवता समुचितं सम्भावितम् । अतएव तु रम्भोर्वशी-प्रभृतीः सर्वा एव अप्सरसो विहाय एषा एव तेन सम्प्रेषितास्ति ।

वायुः आं सखे ! न कश्चिदत्र संशयः ।
(मेनका चिन्तनमुद्राभङ्गं नाटयति ।)

मधुः (मेनकाभिमुखो भूत्वा)—आदिशतु देवि ! मदर्थं किं कर्त्तव्यजातं निर्धारितं भवत्या ?

मेनका (मधुं मधुरं पश्यन्ती)—बन्धो ! वसन्त ! महर्षि-विश्वामित्रस्य नेत्रपुरोवर्तिनी भूमिः भवता तथा विभूष-यितव्या यथा सा क्षणे क्षणे मुनिमनोमार्दवं जनयन्ती सततं भवतः सखायमेव समुद्दीपयेत् ।

मधुः (सांञ्जलिः)—यदाज्ञापयति देवी ।

कामः (सोल्लासम्)—मह्यं च को निदेशो भवत्याः ?

मेनका (सस्मितम्)—सुहृद्वर ! यदा यदा विश्वामित्रो मयि मनागपि समुत्सुको भवेत्, तदा तदा भवता तन्मनसि रिरंसावेगो वर्धनीयोऽस्ति ।

कामः (सस्मितम्)—अवगतं देवि !

वायुः अथ मह्यमपि कर्त्तव्यनिर्देशं करोतु भवती ।

मेनका वायुदेव ! सर्वप्रथमन्तु भवता मम दुकूलं मदीयशरीरात् अपहृत्य पृथिव्यामाकृष्यमाणं सत् तपःपूतस्य विश्वा-मित्रस्य चरणयोः पुरतः पातयित्वा कम्पयितव्यमस्ति । तदनन्तरं च यदा यदाहं विश्वामित्रस्य दृष्टिपथं गता भवयेम्, तदा तदा भवता सलीलं कदाचिन्मम उरोज-भागः, कदाचिन्नाभिदेशः, कदाचिच्च जघनाभोगो मन्दमन्दैन स्वीयेन वेगेन स्वैरं विवस्त्रीविधेयोऽस्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वायुः (सस्मितम्)—अतिरमणीयोऽयम् आदेशः ।

मेनका अपरञ्चापि किञ्चित्करणीयमस्ति भवता ।

मधुः (सोत्साहम्)—आदिशतु देवी ।

मेनका समये समये कुन्तल-कपोलकेलिरपि कलनीयास्ति । आत्मनि सदा विश्वामित्रमनोऽनुकूलं शैत्यं मान्द्यं सौरभं चापि सम्भरणीयमस्ति ।

वायुः अवगतार्थोऽहं देवि ! सर्वं सम्यक् करिष्यामि ।

मेनका (सोत्साहं सर्वान् प्रति)—साधु, सखायः ! साधु । एतदर्थमहं भवतां सर्वेषां कृतज्ञा भविष्यामि । (ईषद् विरम्य) किन्तु विश्वामित्रसमक्षं भवन्तो विस्मृत्यापि नागमिष्यन्ति ; (साञ्जलिः भूत्वा) एषा मे सविशेषा प्रार्थना ।

सर्वे (साञ्जलयः)—यदाज्ञापयति देवी ।

(नेपथ्ये मन्दस्वरः श्रूयते ।)

रताः केचिल्लोभे कतिपयजनाः मोहमलिनाः
मदे क्रोधे कामे, जगति वहवो मत्सरयुताः ।
विलोक्यन्तेऽद्यत्वे, विविधविधिकूटाकुलधियः
परं चिच्चैतन्ये, नहि कृतमनाः कोऽपि मनुजः ॥ ४ ॥

(सर्वे श्रुतिमभिनयन्ति ।)

वायुः (सत्वरमुत्तिष्ठन्)—देवि मेनके ! सावधाना भवतु भवती । नूनमेव एष स्वरो महर्षिविश्वामित्रस्य वर्त्तते । मन्ये, सान्ध्यभ्रमणार्थं सः समागतो भवेत् ।

(मेनका, कामो मधुश्च ससंभ्रमम् उत्थिताः भवन्ति ।)

कामः देवि ! अथ किं विधीयेत ? विश्वामित्रस्तु अतर्कित एव समीपमायातः ।

मेनका (सस्मितम्)—भवन्तः अधीरा नैव भवन्तु । यतो हि विदितकर्त्तव्याः सन्ति भवन्तः । यस्मै यद् यत् निर्दिष्ट-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मस्ति, तेन तत्तत् समयानुसारेण कर्त्तव्यम् । अथ कृपया अदृश्यताम् अवलम्बन्तां भवन्तः । अहमपि स्वकर्त्तव्य-जातं प्रारभे ।

सर्वे (साञ्जलयः)—यथाज्ञापयति देवी ।

(त्रयोऽपि अदृष्टा भवन्ति । मेनका तत्रैव वृक्षमूले श्रान्तशरीरा सती शयाना जायते । ततः प्रविशति सजलकमण्डलुपाणिः महर्षिः विश्वामित्रः ।)

विश्वामित्रः (परिक्राम्यन्)—

दया दीनहीने सततं विधेया ; सततं विधेया ।
कृपा क्लान्तकाये त्वरितं च कार्या ; त्वरितं च कार्या ।।
प्रतीकारपात्र क्षमा शंसनीया ; क्षमा शंसनीया ।
न क्रोधो विधेयो न ईर्ष्या विधेया ; न ईर्ष्या विधेया ।।
असूया कदापि न क्वापि विधेया ; न क्वापि विधेया ।
दया दीनहीने सततं विधेया ; सततं विधेया ।। ५ ।।

[मेनकायाः दुकूलं वायुवशीभूय विश्वामित्रस्य समक्षं तच्चरणोपकण्ठे एव समापतति । तद् वीक्ष्य विश्वामित्रो गीताद् गमनाच्च विरमति ; इतस्ततो विलोकयति ; वृक्षमूले सदैन्यं शयानां मेनकां निरूप्य स्वगतं ब्रूते]—

'नूनम् इदं दुकूलम् एतदीयमेव । किन्तु इयं का भवेत् ? .....कथमत्र भूमौ शयाना सम्पतितास्ति ? ..... (मेनकायाः पीडासम्पिण्डितं शब्दं श्रुत्वा) 'प्रतीयते, वराकी पीडावती विद्यते ;' (मेनका सायासं सवेदनास्वरं च पार्श्वपरिवर्त्तनं करोति । विश्वामित्रो दयामनुभवति ; जिज्ञासापरवशश्च तद् दुकूलं पाणिना आदाय तामुपसर्पति ; प्रकाशं च पृच्छति)—

देवि ! भवती कास्ति ?

(मेनका सवेदनास्वरं मौनमवलम्बते ।)

विश्वामित्रः (ईषदुदात्तस्वरेण)—भवती कास्ति देवि ? देवि ! देवि !! देवि !!!

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(मेनका ग्रीवां परिवर्त्य सदैन्यं द्रष्टुं यतते ; समीपस्थं विश्वामित्रमुदीक्ष्य उत्थातुं चेष्टते ; सायासं च शरीरार्धेन एव उत्थाय)

मेनका (साञ्जलिः)—प्रणमामि भगवन् !

विश्वामित्रः चिरं जीवतु देवि ! कामांश्च अवाप्नोतु ।

मेनका (कमण्डलुं दृष्ट्वा)—महर्षिप्रवर ! पिपासुरस्मि ।

विश्वामित्रः (सोत्साहम्)—अलं निराशया । मामके कमण्डलौ विपुलं सलिलमास्ते ; यथेच्छं पीयताम् ।
(मेनका तथास्थितैव स्वमुखे पाणिपुटं करोति ? विश्वामित्रः कमण्डलुविलात् तत्र जलं पातयति ; मेनका जलधारां विलोकयन्ती पयः पिबति ; तदवस्थायाः तस्याः मुखे विश्वामित्रस्य दृष्टिः स्थिरा भवति ; तदानीं मेनकायाश्चञ्चत्कचलहरीचोचुम्ब्यमाना कपोलपाली विश्वामित्राय भृशं रोचते ; सः सानन्दं तां पयः पाययति ।)

मेनका (तृप्तिमनुभवन्ती, पाणिपुटं त्रोटयन्ती पयःपानाच्च विरमन्ती) —अलं मुनिवर ! एतावदेवालम्; तृप्तिः सञ्जाता । भवदाभारं सदा धारयिष्यामि । (विश्वामित्रपाणौ स्वीयं दुकूलं दृष्ट्वा आत्मानं सलज्जं विलोकयति ।)

विश्वामित्रः अलं लज्जया । उड्डीय पथि पतितं भवत्याः इदं दुकूलं मया लब्धमस्ति । गृह्यतामेतद् [पाणिं प्रसार्य प्रयच्छति ।] ।

(मेनकामुखे दत्तदृष्टेः विश्वामित्रस्य हस्तात् तन्मुखं वीक्षमाणा मेनका स्वीयं दुकूलं करं प्रसार्य गृह्णाति ; अस्मिन् व्यापारे तस्याः कराङ्गुलयो विश्वामित्रस्य कराङ्गुलीः संस्पृशन्ति ; विश्वामित्रश्च संस्पर्शसुखमनुभवति ; मेनका दुकूलमादाय परिदधाति ।)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनका　मुनिवर ! भवता भृशमुपकृतास्मि ।
(विश्वामित्रस्य चरणयोः शिरो निदधाति ।)

विश्वामित्रः　(सस्नेहम्) - अलम् आभारातिशयेन देवि ! नन्वेष तु मामको धर्म एव ।

(हस्ताभ्यां मेनकां तदीयभुजमूलयोः गृहीत्वा उत्थापयति ; एवं करणेऽपि स्पर्शसुखमनुभवति ; ततः ऊर्ध्वं विलोक्य स्वयमपि तत्रैव समुपविशति ।)

मनका　(अस्तङ्गच्छन्तं भास्वन्तं विलोक्य)—भगवन् !
भवतः आश्रमः कियति दूरे विद्यते ?

विश्दामित्रः　समीपे एव विद्यते ।

(मेनका सचिन्ता सती तूष्णीम् आस्ते ; नेपथ्ये कोकिलकलकाकली संश्रूयते ; समीरे च सौरभम् अनुभूयते ।)

विश्वामित्रः　देवि ! भवती अवशशरीरा प्रतिभाति ; सूर्यश्च वारुणीं व्रजन्नस्ति ; तदस्मिन् निर्जनप्राये हिंस्रजन्तुबहुले च प्रदेशे भवत्याः अवस्थानं साम्प्रतम् असाम्प्रतम् अस्ति। अतो भवती गृहं प्रयातु ।

मेनका　(पश्चिमायामनुरक्तं सूर्यं साभिप्रायं समीक्ष्य)—दयानिधे ! भवता साम्प्रतिकं समुदीरितम् । हिंस्रजन्तुभ्यो भृशमहं बिभेमि । तदधुना इतस्तु मया गन्तव्यमेव । (सायासमुत्थाय साञ्जलिः) भवतोऽधमर्णास्मि ; कृतज्ञास्मि ; यदि शरीरमेतदवशिष्यते, तर्हि भवत्सेवया कदाचिदात्मानं कृतार्थयिष्यामि । अथानुजानातु भगवान् मामितः प्रस्थातुम् ।

(मेनका अभिवादनमुद्रायां विश्वामित्रस्य चरणौ स्वपाणिभ्यां त्रिवारं संस्पृश्य मन्दं मन्दं प्रस्थातुं प्रयतते ; विश्वामित्रस्तां सस्नेहं निर्निमेषं च विलोकयति ।)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वामित्रः (उत्थाय) देवि ! तिष्ठतु ; (मेनका विरमति ।) इदानीम् एकाकिनी गन्तुं नार्हति भवती ; तदहं भवतीं भवत्याः गृहं प्रापयामि । कथयतु क्वास्ति भावत्कं गृहम् ?

मेनका (सवैराग्यम्) –भगवन् ! अस्यां विपुलायां धरायाम् अनाथायै मह्यं विधात्रा अधुनावधि किमपि गृहं न निर्मितम् ; यत्राहं भवदनुगता व्रजेयम् ।

विश्वामित्रः (सदयम्)—देवि ! तवानेन सकरुणेन वृत्तेन नूनमेव विधातुर्मतिमान्द्यं निष्कारुण्यं च प्रकटीभवतः । परं खेदं मा वह ; संसारे सुखमिव दुःखमपि भङ्गुरं भवति ।

(मेनका वारुणीसेवालीयमानं सूर्यं निर्निमेषं शून्येन मनसा द्रष्टुमारभते ; इदानीं तस्याः मुखं नितरामभिरामं बोभवीति ; विश्वामित्रश्च तन्मुखमाधुरीं स्वनयनाभ्यां सविशेषं पातुं प्रवर्तते ; तस्मिन्नेव क्षणे एकेन लोललोलेन मृगेणोपलाल्यमाना मृगी सलीलम् एकतः प्रविश्य अपरतो निष्क्राम्यति ; मेनकाविश्वामित्रौ तौ मृगदम्पती दृश्यतः ; तदनन्तरं तौ परस्परं सविशेषं पश्यतः ; मेनका सनैराश्यम् अधोमुखी भवति ; विवक्षुर्विश्वामित्र. प्रस्फुरिताधरो भवति ।)

विश्वामित्रः (समार्दवम्)—देवि ! का ते संज्ञा ?

(मेनका तूष्णीं तिष्ठति ।)

विश्वामित्रः (ससान्त्वनम्)—देवि ! अलं विषादेन । मया ते संज्ञा पृच्छ्यते ।

मेनका (धरादत्तदृष्टिरेव) —भगवन्! अनाथाया मे न का संज्ञा संजाता ? यस्मै या संज्ञा रोचते, स तया संज्ञया एव मां सम्बोधयितुं प्रारभते । अतः का न मे संज्ञा ? भवानपि यथारुचि कयापि संज्ञया मां सम्बोधयितुं शक्नोति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वामित्रः यद्येवन्तर्हि, यतस्त्वया 'मे न का संज्ञा?' इति पदं सदैन्यं समुदीरितम् ; अतोऽहमद्य, 'मेनका' इत्येव सार्थकां संज्ञां ते करोमि । अपि रोचते तुभ्यम् ?

मेनका (तथास्थितैव सस्मितम्)—यदि भवते रोचते, तर्हि मह्यमपि रोचते ।

विश्वामित्रः (सोत्साहम्)—तर्हि शृणु मेनके ! अहं विश्वामित्रोऽस्मि ; समीपे एवं स्वीये आश्रमे तपसे वसामि ; सम्प्रति त्वमपि तत्रैव मया सह निर्भयं निस्संकोचं च चलितुमर्हसि ; यावत्कालपर्यन्तं च तुभ्यं रोचेत, तावत्कालपर्यन्तं त्वं मदीयसंरक्षणे निवस्तुं शक्नोषि ।
(मेनका विश्वामित्रमुखं पश्यति ; तत्र दयां स्नेहं साक्षात्करोति ।)

मेनका (साञ्जलिः)—मुनिवर ! भवान् अतीव दयालुरस्ति ; मह्यन्तु साक्षात्परमेश्वरोऽस्ति; भवत्संरक्षणे उषित्वा तु मम जीवनमेव धन्यं भविष्यति ।
(विश्वामित्रस्य पादयोः पतति ।)

विश्वामित्रः (सस्नेहम्)—अयि, इदं किम् ? मेनके । उत्तिष्ठोत्तिष्ठ । पश्य, तमो वर्धमानमस्ति ; उत्तिष्ठ, आश्रमं चलेव ।
(विश्वामित्रस्तामुत्थापयति ; मेनकामश्रुनयनां च निरीक्ष्य) मेनके ! तवेमानि अश्रूणि मां पीडयन्ति ।

मेनका (दुकूलेन अश्रूणि प्रोञ्छन्ती)—इमानि अश्रूणि आनन्दातिशयजनितानि सन्ति मुनिवर ।

विश्वामित्रः यद्येवन्तर्हि सुखजनकानि; एहि, चलेव ।

मेनका यदाज्ञापयति भगवन् !
(मेनकयानुगम्यमानो विश्वामित्रो गन्तुमारभते ।
ततः शनैः शनैः जवनिका मञ्चमाच्छादयति ।)

॥ इति तृतीयोऽङ्कः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

!! चतुर्थोऽङ्कः !!

(ततो मञ्चाग्रभागे तापसवेषौ उभौ किशोरौ परस्परं वार्तालापं कुर्वन्तौ प्रविशतः ।)

प्रथमः सखे ! बलव्रत ! समिदाहरणाय अद्य कस्यां दिशि यास्यसि ?

बलव्रतः आर्य ! देवल ! अधुनावधि अनिश्चितमेव ।

देवलः सखे ! सखेदो दृश्यसे ; अस्याः खिन्नतायाः किं कारणम् ?

बलव्रतः किं कथयानि आर्य ! छिन्ना ममाशालता ।

देवलः कथय बन्धो ! कथमेषा निराशा ?

बलव्रतः भवांस्तु जानीते एव यद् बलातिबलाख्ये विद्ये समधिगन्तुम् अहं महर्षिविश्वामित्रस्य अन्तेवासित्वमङ्गीकृतवानस्मि ।

देवलः आम् । इदन्तु समीचीनमेव । गुरुदेव एव पुरुषार्थचतुष्टयदायिकयोः सर्वभ्रमोपनाशिकयोश्चानयोरुभयोरेव विद्ययोः मर्मज्ञो महर्षिरस्ति ।

बलव्रतः इदमेव ज्ञात्वा तु अहमत्र समागतवानस्मि ।

देवलः इदमहं वेद्मि । अग्रे कथय किं जातम् ?

बलव्रतः अद्य गुरुदेवेन कथितमस्ति यत् 'बलव्रत ! सम्प्रति एनद्विद्याद्वयस्य ग्रहणे त्वयि पात्रतां न पश्यामि । अतस्त्वं परित्यज्य तद्विषयिणीं प्राप्तिकामनां यथेच्छं गन्तुमर्हसि' इति । अत एव कथयामि तात ! यत् छिन्ना ममाशालतेति ।

देवलः (सोच्छ्वासम्)—इदं तु वास्तवं दुःखम् ।

(उभौ मौनं गतिं नाटयतः ।)

बलव्रतः अथ भवानेव उपदिशतु, मया किं करणीयम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देवलः (विचिन्त्य)—बलव्रत ! गुरुदेवो न स्वप्नेऽपि मिथ्या वदति। अतस्तद्वचसि विकल्पं न विधाय त्वया तद्-विषयिणी पात्रता एव अर्जनीया।

वलव्रतः (सभ्रूसंकोचम्)—नहि आर्य देवल ! इदमित्थं नास्ति।

देवलः तर्हि किमस्ति !

बलव्रतः भवान् अवधानं न ददाति ; किन्तु अहं सर्वं ज्ञातवान-स्मि।

देवलः (सावेगम्)—किं ज्ञातवानसि ?

बलव्रतः इदमेव यद्, यतः प्रभृति सा मेनकानाम्नी युवतिरत्न समायातास्ति, ततः प्रभृत्येव गुरुदेवो ममोपेक्षां करोति।

वेवलः अयं ते भ्रमः। मम मनसि तु कदाचिदपि इयमनुभूति-र्नाभवत्।

बलव्रतः (ईषद् विहस्य)—आर्य ! भवान् ऋजुमनाः अस्ति ; अतएव।

देवलः (साक्षेपम्)—तर्हि इमामनुभूतिं कर्त्तुम् अहं कुटिलो न बुभूषामि (सहगमनाद् विरमति।)।

बलव्रतः (सानुनयम्)—आर्य ! भवांस्तु मुधैव मयि प्रकुपितो जातः।

देवलः अकारणो नायं मम कोपः।

बलव्रतः वाढम्। किन्तु भवानपि तु विचारयतु ; तया समागतया एव इदं तपोवनं परिष्कृत्य उपवनीकृतम् ; महर्षि विश्वामित्रं परित एव अहर्निशं सेवमाना सा वसति ; तस्मै भोजनमपि स्वयं निर्माय समर्पयति ; प्रातः सायं भ्रमणविधावपि सा तेनैव सह भवति ; सदैव सा महर्षिं छायेव समनुसरति। महर्षिरपि तामेव स्वतपःसिद्धिमिव मन्यमानो मां निरीक्ष्यापि न निरीक्षते ; मया किमपि पृष्टोऽपि च न मां बहु बोधयति।

देवलः बलव्रत ! त्वया तु तस्याः देव्याः प्रशंसा विधेया, या तपःखेदखिन्नं व्रतोपवासादिक्षीणदेहम् आस्माकीनं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गुरुवरं सेवया सुखयति । किन्तु त्वन्तु असूयसे तस्यै ?

बलव्रतः (स्वैरं स्वैरम्) —भवान् नहि जानाति ; तस्याः रूप-मदिरा अतीव प्रभाववती विद्यते ; गुरुश्च तस्यामासक्तो भवन्नस्ति ।

देवलः (सस्मितम्)—बलव्रत ! त्वं हृदयहीनोऽसि, य एवं-विधेऽपि नैसर्गिके हृदयव्यापारे दोषमालोकयसि । अहन्तु मन्ये—

विश्वामित्रो महातेजाः मेनका मणिदीपिका ।
संगतौ चेत्तदा नूनं राष्ट्रज्योतिरुदेष्यति ॥ १ ॥

बलव्रतः भवतु नाम । परमिदं मह्यं न रोचते ।

देवलः जायन्ते च म्रियन्ते च नित्यमस्मादृशा जनाः ।
स जातो येन देशस्य नामसंकीर्त्तनं भवेत् ॥ २ ॥
(किञ्चिद् विचिन्य) बलव्रत ! मन्ये, गुरुदेवेन तव मनोमलिनिमा अनुभूतो भवेत् । अतस्तवात्र अवस्थानं तुभ्यं गुरुशापकारणं भवितुं शक्नोति । तस्माद् गुरुदेव-वचोऽनुसारेणैव त्वं स्वमनोऽभिलाषानुरूपसिद्धिप्राप्तये आत्मनि पात्रतामर्जयितुम् अन्यत्र कुत्रापि रहसि तपः समाचर ।

बलव्रतः (सभयम् ईषद् विचिन्त्य)—उचितमेव उदीरितं भवता; अहं श्व एव इममाश्रमं विहास्यामि ।

देवलः एवमेव विधेहि । एहि, अद्यतनं स्वं स्वं कर्त्तव्यं पालयेव ।

बलव्रतः आम् । चलतु, चलेव ।

(उभौ निष्क्राम्यतः ।)

॥ **इति विष्कम्भकः** ॥

(क्षणिकनीरवतानन्तरं जवनिका शनैः शनैरपसरति ; सलीलं पुष्पसञ्चयं विदधाना सुरम्यपरिधाना मेनका नयनपथमवतरति ।)

मेनका रतीहा वासन्ती भवति नहि शक्या शमयितुं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशेषेणैकान्ते प्रकृतिकमनीये सुललिते ।
समासन्ने हृद्ये परमसुखदे च प्रियतमे
न जाने मे प्रेयान् मयि रतियुतो वाऽरतियुतः ॥ ३ ॥

(ततस्सा समीपस्थां महीरुहसङ्कताम् एकां प्रफुल्लां लतामालोक्य पुष्पसञ्चयाद् विरमति ; सस्पृहं च तामेव विलोकयन्ती शस्यकोमलाम् एकां मृद्वेदिकामधितिष्ठति; पुष्पहारसंरचनायां प्रवर्तते ; स्वगतं च विचारयति—

अहो ! महर्षिविश्वामित्रस्य मनस्विता मनुष्यता च ? ·····स्वार्थपरायणो देवराजो मुधैव अस्मै असूयति । ····· अस्य महानुभावतां प्रत्यक्षं दर्शं दर्शं महन्तु आजीवनम् एतदीया बुभूषामि । ·····अस्य सन्निधौ मया यावान् हृदयहर्षोऽनुभूयते, ·····तावान् ·····न कदापि ·····देवराजस्यापि सन्निधौ अनुभूतः । अहो ! वैलक्षण्यम् अस्य व्यक्तित्वे ! यतोहि यथा यथा अस्य सेवां करोमि तथा तथा एनं सेवितुम् अभिलाषो वर्धते एव; ·····अस्य सेवायाम् आनन्दोऽपि अमन्दो लक्ष्यते । ·····मन्ये, मम पूर्वजन्मनः किमपि पुण्यं प्रतिफलितम्; येन अस्य सेवावसरो लब्धः । (पुष्पहारे अन्तिमं पुष्पं ग्रथ्नाति ।) ·····मुनिवर ! विश्वामित्र ! त्वां सुखयितुम् ·····अहं सर्वं त्यक्तुं शक्नोमि । ····· (सम्पन्नं पुष्पहारम् उभयोः करयोः गृहीत्वा सविशेषं पश्यति । तस्मिन्नेव क्षणे विश्वामित्रः प्रविशति ।)

विश्वामित्रः (मेनकामुपसृत्य सस्नेहम्)—मेनके ।

मेनका (ससम्भ्रममुत्थाय)—मुनिवर ! प्रणमामि ।

विश्वामित्रः (सहर्षम्)—मनोरथः सफलो भवतु ।

मेनका (सस्मितम्)—अनुगृहीतास्मि ।

विश्वामित्रः (पुष्पहारं वीक्ष्य सस्मितम्)—मेनके ! त्वयार्यं पुष्पहारस्तु अतिरम्यो विरचितः । एनेन कं सम्मानयितुं समीहसे ?

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनका (सभावविशेषम्)—मुनिवर! अत्र भवन्तमपहाय नान्यः कश्चिदपि मम पूजार्हः।

विश्वामित्रः (सविस्मयं सहर्षं च)—मेनके! अपीदं सत्यम्? परिहासो वा?

मेनका (सस्मितम्)—मुने! इदं सत्यमेव।

विश्वामित्रः (सहर्षं समार्दवञ्च)—मेनके! अपि सुखयति त्वां मम सन्निधिः?

मेनका (सानन्दम्)—अत्यधिकम्। अथ तु 'भवत्सन्निधिरेव मम जीवननिधिः' इत्यहं सदानुभवामि (इति सस्मितं समुदीर्य विश्वामित्रस्य ग्रीवायां पुष्पहारं समर्पयति; सस्मितो विश्वामित्रो मेनकानयनयोः निर्निमेषं पश्यति; मेनका अधोनयना भवति; विश्वामित्रो वेदिकामधितिष्ठति।)

विश्वामित्रः (सस्मितम्)—मेनके! आगच्छ; इतस्तिष्ठ। (वामेन करेण वेदिकावामभागं निर्दिशति; किन्तु मेनका भूमावेव समोदं समुपविशति; विश्वामित्रः इतस्ततो विलोकयति; सर्वत्र सर्वं रम्यं हृद्यं च समनुभूय भूयो मेनकां सस्नेहं निर्निमेषं च निरीक्षितुं प्रारभते; समीरोऽपि तदानीं सुरभितो बोभूयते; मन्दं मन्दं च मेनकायाः मुखे कुन्तलकपोलकेलिं कलयितुम् आरभते; तद्वक्षोजौ च विवसनौ चिकीर्षति।)

मेनका (सस्मितं पुष्पभाजनात् पुष्पाणि निष्कास्य विश्वामित्रचरणयोः समर्घ्य पुनश्च तच्चरणौ स्वपाणिभ्यां गृहीत्वा तन्मुखे दत्तदृष्टिः)—मुनिवर! अनाथाहं भवन्तमासाद्य आत्मानं सनाथां मन्ये। अत एव भवत्स्नेहसुधासंसिक्ता अहमाजीवनं भवत्सेवासुखं लब्धुमीहे।

विश्वामित्रः (मेनकायाः शिरसि पाणिं निधाय)—मेनके! त्वया या सेवा विहिता विधीयते च सा अननुभूतपूर्वास्ति। तया ममात्मा परमां प्रीतिमापन्नोऽस्ति। अतस्तव योगक्षेमवहने यथाशक्ति यतिष्ये; त्वम् अधीरा मा भूः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनका (साञ्जलिः)—मुनिवर ! अद्याहं कृतार्था जातास्मि ; यस्यां भवान् एवं स्निह्यति (इत्युक्त्वा विश्वामित्रस्य चरणयोः शिरो निदधाति) ।

विश्वामित्रः (उत्थाय सस्नेहं च मेनकां पाणिभ्यां तद्बाहुमूलयोः गृहीत्वा उत्थापयन्)—अलमलमेतेन मेनके ! उत्तिष्ठ; त्वं तु रमणीमणिरसि । मयि च सन्निहिते सति कुतो दैन्यमनुभवसि ?

(मेनका सेषल्लज्जमुत्तिष्ठति ; विश्वामित्रस्तां कपोलयोः समार्दवं गृह्णाति ; सस्मितं निर्निमेषं च तन्नयने निरीक्ष्य अधरीकृतचन्द्राभं तदीयं ललाटं परिचुम्बति ।)

मेनका (सानन्दम्)—मुनिवर !

आनन्दते यथा लब्ध्वा स्वातेयं चातकी पयः ।
आतृप्यामि तथा प्राप्य चुम्बनं भवता कृतम् ॥ ४ ॥

विश्वामित्रः मेनके ! मम हृदयेऽपि तथैवावेहि ।

तपस्याखेदखिन्नोऽहं विजनो निर्जने वने ।
आत्मीयामिवाप्य त्वामनुभवामि सुखं सदा ॥ ५ ॥

मेनका (सहर्षम्)— इदं मे सौभाग्यमेव मुनिवर ! यदि मनागपि सुखयितुमर्हामि भवन्तम् । किन्तु भवन्तं सेवमानाहं यदा-कदा भवतो बिभेम्यपि ।

विश्वामित्रः (सविस्मयम्)—कस्माद्धेतोः ?

मेनका केनापि ममापराधेन कुपितो भवान् मां स्वाश्रमात् निष्कासयेदिति कल्पिताद्धेतोः ।

विश्वामित्रः (सहासम्)— नहि नहि मेनके ! इयं कल्पना मनसो निष्कास्यताम् । यतो हि—

भक्तो न भक्तिं सुखदां जहाति
सेव्यो न सेवानिपुणं तथैव ।
कश्शारदीमिन्दुकलां मनोज्ञां
गेहात्स्वकीयादपवारयेन्ना ? ॥ ६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपि च—

यतो दिनादागतवत्यमुष्मिन्
ममाश्रमे त्वं शरणागतेव ।
ततो दिनादेव मदीय आत्मा
त्वदीयसेवामनुबोभवीति ॥ ७ ॥

दोषात्मनां रूपसुधा न लभ्या
रम्याकृतीनां नहि दोषवृत्तिः ।
अतोऽपराधे तव चित्तवृत्ति-
र्भवेत्कदापीदमहं न मन्ये ॥ ८ ॥

मेनका (सानन्दम्)—अथाहं परमाश्वस्ता जातास्मि मुने ! वस्तुतो भवान् न केवलेन तपसा एव, अपितु हृदयवैभवेनापि अनुपमो लोके । सम्प्रति—

भवन्तं सुहृदं प्राप्य वीताश्चिन्ता ममाखिलाः ।
अथ मे जीवितं सर्वं भवदर्थं भविष्यति ॥ ९ ॥

विश्वामित्रः (सोल्लासम्)—मेनके ! श्रुतं तत्, यदासं श्रोतुकामः (इत्युक्त्वा मेनकामाश्लिष्यति ; उभौ अमन्दमानन्दमनुभवतः) ।

(नेपथ्ये)

शरणागतोऽस्मि भगवन् ! ……हे अखिलस्य विश्वस्य मित्र ! ……क्वास्ति भवान् ? ……परित्रायतां मां भगवन् ! परित्रायताम् ।

विश्वामित्रः (श्रुतिमभिनीय मेनकाश्लेषं शिथिलयन्)—मेनके ! प्रतीयते कश्चिद् दुःखी स्वकीयम् आश्रमम् आयातः ।

मेनका (आश्लेषं जहतीव)—अं मुनिवर ! आतपार्त्तो घनच्छायं वृक्षमायात्येव ।

विश्वामित्रः (सस्मितम् आश्लेषं विहाय, मेनकाकपोलौ करयोः स्पृशश्च)—अथ त्वं कुटीरं चल ; अहं तावदभ्यागतं सम्भावयामि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनका यथाज्ञापयति देवः ; (पुष्पभाजनम् आदाय, सस्नेहम्) भवानपि अतिथिं सन्तोष्य यथाशीघ्रं समायातु ; तावदहं भवते आहारव्यवस्थां सम्पादयामि ।

विश्वामित्रः (सस्मितम्)—एवमस्तु ।

(उभौ निष्क्राम्यतः; आभ्यन्तरिकी जवनिका अपसरति; ततश्च एकेन यूनानुगम्यमानो वृद्धपुरुषो मञ्चे परिक्राम्यन् अवलोक्यते ।)

वृद्धः (इतस्ततो विलोकयन् युवानं प्रति)—पुत्रक !

युवा आं तात !

वृद्धः महर्षिविश्वामित्रस्य आश्रमस्तु अयमेव । .....प्रतीयते क्वचिद् गतोऽस्ति सः । अतो यावत्स आयाति, तावदस्यामेव वेदिकायाम् उपविश्य तं प्रतिपालयावः ।

युवा एवमेव तात !

(उभौ वेदिकामधितिष्ठतः)

वृद्धः (युवकस्य पृष्ठं परामृशन्)—पुत्रक देवव्रत ! त्वं विदितवेदितव्योऽसि ; अतो मन्ये यद् विश्वस्य मित्रस्य प्राणिमात्रहितकारकस्य महर्षिविश्वामित्रस्य उपदेशं पालयिष्यसि ।

देवव्रतः बाढं तात ! यदि तदुपदेशो मम बुद्धिं परितोषयिष्यति ।

वृद्धः (सदैन्यम्)—एवमेव पुत्र !

(वृद्धः सचिन्तो भवति ; ततः प्रविशति विश्वामित्रः ।)

विश्वामित्रः (उभावालोक्य)—कुतस्त्यौ भवन्तौ ? अपि भवतोरेव अन्यतरेण अहमाकारितोऽस्मि ?

वृद्धः (श्रुत्वा समक्षं च विश्वामित्रं वीक्ष्य सहर्षं सत्वरं च साञ्जलिरुत्थाय)—भगवन् ! अशरणशरण । प्रणमामि (इत्युक्त्वा विश्वामित्रचरणयोः शिरो निदधाति) ।

विश्वामित्रः सुखी भव सर्वदा (वृद्धमुत्थापयति) ।

युवा (साञ्जलिः)—प्रणमामि मुनिवर !

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वामित्रः आयुष्मान् भव ।

वृद्धः (साञ्जलिः) —भवतः शरणमागतोऽस्मि ।

विश्वामित्रः (सादरम्)—आगम्यताम् ; प्रथमं मार्गश्रमोऽपनीयताम् ।

वृद्धः नहि नहि भगवन् । मार्गश्रमस्तु आश्रमभूमिसीमन्येव शान्तिमुपनीतः । इदानीं तु मनःश्रम एव बाधमानोऽस्ति ।

विश्वामित्रः (वृद्धं युवानं च क्रमेण निभाल्य)—यदि एवम् ; तर्हि प्रस्तुतोऽस्मि भवन्मनःश्रमापहाराय ; तिष्ठतां भवन्तौ ; कथयतां च अत्रागमनप्रयोजनम् (इत्युदीर्य तामेव वेदिकां स्थातुं निर्दिशति ; सर्वे च तत्र यथास्थानं समुपविशन्ति) ।

वृद्धः महात्मन् । कर्मपुरवास्तव्यो मेधाव्रतो नामाहं क्षत्रियवंशसमुद्भवोऽस्मि । देवव्रतनामा ममायम् एकलस्सूनुः ; विद्यामवाप्य इदानीमयं मां तथा स्वीयामेकात्मजाँ जरातुरां च जननीं परित्यज्य संन्यासी बुभूषति । ..... आवाभ्यां बहुशो बोधितोऽपि न विरमति स्वीयविचारात् । .....भगवन् ! यद्येष परिव्राड् भवति, तर्हि न केवलम् आवयोर्दुरवस्था, अपितु वंशविनाशोऽपि भविष्यतीति ध्यायं ध्यायम् अहम् एनं कथङ्कथमपि भवतां सविधे आनीतवानस्मि । अथ भवन्त एव प्रमाणम् । कृपया बोधयन्तु मामिमं वा, यदयं परिव्रजेत् ? उताहो उद्वहेत् ?

विश्वामित्रः (सगाम्भीर्यम्)—भवत्समस्या तु वस्तुतो जटिला ।

वृद्धः (साञ्जलिः)—भगवन् ! अतएव भवच्छरणं समागतोऽस्मि ।

विश्वामित्रः (ईषद् विचिन्त्य युवानं प्रति सस्नेहम्)—तात, देवव्रत ! कुतोऽधीतवानसि ?

देवव्रतः (साञ्जलिः)—भगवन् ! तत्रभवतः महर्षिकण्वात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वामित्रः (सहर्षम्)—महर्षिकण्वस्ते गुरुः, इति विज्ञाय मयि महान् प्रमोदः। कथय, स कुशली तु वर्त्तते ?

देवव्रतः स तु सततकुशलः।

विश्वामित्रः (सस्मितम्)—अपि कदाचित्स मां स्मरति ?

देवव्रतः आं भगवन्! हार्दिकेन सख्यभावेन महता समादरेण च।

विश्वामित्रः अथ कथय, कियन्ति हायनानि अधीयानस्तं सेवितवानसि ?

देवव्रतः द्वादश वर्षाणि।

विश्वामित्रः अपि स्वगुरूपदेशे सश्रद्धोऽसि ?

देवव्रतः आं भगवन्! सर्वथा।

विश्वामित्रः (सस्मितम्)—समावर्तनसमये तव गुरुणा तुभ्यं किमुपदिष्टमस्ति ? अपि स्मरसि ?

देवव्रतः बाढं स्मरामि। इदानीमादिष्टोऽहमासं गुरुचरणैर्यद् (स्मरन्निव) 'वत्स, देवव्रत! प्राप्तविद्योऽसि; अथ स्वगृहं याहि; विद्यानुरूपावदातकर्मभिः स्वराष्ट्रं सेवमानः पितरौ प्रीणय' इति।

विश्वामित्रः (सस्मितम्)—वत्स! अपि तु गुरूपदेशं पालयितुमीहसे!

देवव्रतः (सोत्साहम्)—अत एव तु अहं संन्यासी बुभूषामि।

विश्वामित्रः (गाम्भीर्यपूर्वकम्)—वत्स! संन्यासी भूत्वा गुरूपदेशस्य स्वल्पांशमेव पालयितुं शक्ष्यसि।

देवव्रतः (सत्वरम्) तत्कथम् ?

विश्वामित्रः (सप्रत्ययम्)—वत्स! मनाग् अवधानं देहि मम वचसि—'संन्यासी स्वराष्ट्रसेवायै केवलं जनान् प्रेरयितुमेव शक्नोति; अतस्तत्कृतेयं राष्ट्रसेवा केवलं वाङ्मयी एव; न तु कर्ममयी। अथ च यावत् कर्मणा न सेव्यते राष्ट्रदेवः, तावन्मनसा वाचा सेवितोऽपि नाभीष्टफलदायकः।'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देवव्रतः (सस्मितम्)—मुनिवर ! संन्यासिनः फलेन प्रयोजनं न भवति।

विश्वामित्रः (सस्मितम्)—वत्स ! एतेन सिद्ध्यति यत्संन्यासिजीवनं निष्फलं निष्प्रयोजनं च.....एवञ्च निष्प्रयोजने कर्मणि बुद्धिमन्तो न प्रवर्तन्ते।

(वृद्धो हर्षमनुभवति)

देवव्रतः भगवन् ! राष्ट्रसेवा किं निष्प्रयोजना ?

विश्वामित्रः वत्स ! नाहं वदामि यद् राष्ट्रसेवा निष्प्रयोजना; सा तु सप्रयोजना एव।

देवव्रतः तत्कथं ततो वारयति मां भवान् ?

विश्वामित्रः (सस्मितम्)—वत्स ! राष्ट्रसेवातो मनागपि न वारयामि त्वामहम्। किन्तु राष्ट्रसेवारूप-सप्रयोजनकार्यसिद्धये एव निष्प्रयोजनात्संन्यासिजीवनाभिलाषाद् वारयामि।

(देवव्रतश्चिन्तामग्नो भवति।)

वत्स ! विद्यावतो जीवनं यदि फलाभिलाषहीनं भवति, तर्हि तत्कृतानि कर्माण्यपि व्यर्थानि एव; एवञ्च—'विद्या व्यर्था कृतिं विना' इत्युक्त्यनुसारं तस्य विद्याधिगमोऽपि व्यर्थ एव। अपि त्वं स्वीयां विद्यां मोघीकर्तुं वाञ्छसि ?

देवव्रतः (अधीरम्)—नहि-नहि, परिश्रमप्राप्तां निजां विद्यां न कदापि मोघां करिष्यामि। .....(विचिन्त्य सानुनयम्) अथ भवानेव बोधयतु तत्त्वकर्त्तव्यजातं येन गुरूपदेशपालनं स्यात्।

विश्वामित्रः (सस्मितम्) एवन्तर्हि, संन्यासि-बुभूषा त्यज्यताम्; क्रमप्राप्तं गार्हस्थ्यम् अवलम्ब्यताम्; सममेव मनसा वाचा कर्मणा च राष्ट्रमपि सेव्यताम्। एवं कृते राष्ट्रसेवा पितृप्रीतिश्च उभयमपि त्वया कर्तुं शक्यते।.....

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(विचिन्त्य) अथ वत्स ! तव गुरूपदेशस्यापि इदमेव तात्पर्यमस्ति।

(देवव्रतो भ्रान्तिमुक्तो भवति; प्रसीदति; स्वीयं वृद्धं पितरं च पश्यति। पिता अधोदृष्टिरस्ति।)

विश्वामित्रः (सस्मितम्) – वत्स, देवव्रत ! अपि मम वचसि कश्चित्ते संशयः ?

देवव्रतः (साञ्जलिः सश्रद्धं च)—नहि, भगवन् ! भवता तु मम सर्वे संशयाश्छिन्नाः; विनाशोन्मुखं मम जीवनं रक्षितम्; तत् सार्थकं विहितम्; मम पितरौ रक्षितौ; वंशश्च। अहमाजीवनं भवदृणी भविष्यामि। गुरूपदेशस्य सदर्थबोधकत्वाद् भवानपि मम गुरुरेव (इत्युत्थाय विश्वामित्रस्य चरणयोः शिरो निदधाति; वृद्धः साश्रुनयनोऽमन्दमानन्दमनुभवति।)

विश्वामित्रः (देवदत्तशिरसि हस्तौ सन्धार्य)—चिरं जीव वत्स ! उत्तिष्ठ! अहमतीव प्रसन्नोऽस्मि त्वयि यत्त्वया सन्मार्गोऽङ्गीकृतः।.....(विचिन्त्य) उत्तिष्ठ वत्स ! स्वीयं पितरम् अभिवादयस्व।

देवव्रतः (उत्थाय पितरमभिवाद्य)—तात ! क्षन्तव्योऽस्मि। अथाग्रे भवन्तं कदापि न खेदयिष्यामि।

वृद्धः (सगद्गदस्वरम्)—जात! चिरं जीव; सुखी भव (इत्यभिधाय स्वाश्रूणि प्रोञ्छति; ततश्च उत्थाय साञ्जलिः विश्वामित्रं कथयति)भगवन् ! अशरणशरण ! दीनबन्धो ! भवताहं पुनरुज्जीवितोऽस्मि। आजीवनं भवत्कृतम् इमम् उपकारं न विस्मरिष्यामि (इत्युक्त्वा स्थितस्य विश्वामित्रस्य चरणयोः शिरो निदधाति।)

विश्वामित्रः (सहर्षमुत्तिष्ठंस्तमुत्थापयंश्च)—अलं बन्धो ! अलम्। उत्तिष्ठ; त्वं तु भाग्यशाली असि, य एवम्भूतं गुणशालिनं पुत्रं प्राप्तवानसि; अहं मुदमनुभवामि। (वृद्धः साञ्जलिरेवोत्तिष्ठति।) अथागम्यताम्; आश्रमे ससुखं विश्रामो लभ्यताम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वृद्धः भगवन् ! अमन्दानन्दजनकम् इमं वृत्तान्तं देवव्रतस्य जननीं श्रावयित्वा तामपि आनन्दयितुम् भवान् आवां गन्तुम् अनुजानातु; सा वराकी··· ···।

देवव्रतः (सोत्कण्ठं साञ्जलिः)—एवं भगवन् ! जननीं द्रष्टुकामोहं भवदाज्ञां वाञ्छामि।

विश्वामित्रः (सहर्षम्)—एवमस्तु; पन्थाश्च शुभोऽस्तु।

(उभौ विश्वामित्रं प्रणम्य निष्क्रान्तौ; विश्वामित्रोऽपि क्षणं विचिन्त्य निष्क्राम्यति; जवनिका तमनुसरन्तीव प्रसरति।)

॥ इति चतुर्थोऽङ्कः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

।। पञ्चमोऽङ्कः ।।

(शनैः शनैः जवनिका अपसरति; देवेन्द्रभवनोपमे रङ्ग-मञ्चे पारिजातपुष्पपाणिः दिव्यासनासीनो विचारमग्नो देवराजो दृश्यते; क्षणानन्तरं च प्रतीहारी प्रविशति ।)

प्रतीहारी (अभिवादयन्ती-- देवाधिदेव ! भवन्तं दिदृक्षवो वायु-मधु-कामदेवाः द्वारि समायाताः सन्ति । तेभ्यो भावत्की काज्ञास्ति ?

देवराजः (श्रुत्वैव प्रतीहारीं विलोकयन्) —किम् ?

प्रतीहारी (साञ्जलिः) —वायु-मधु-कामदेवाः समायाताः सन्ति । तेभ्यो भावत्की काज्ञास्ति ?

देवराजः (श्रुत्वा सहर्षम्) - प्रतीहार ! त्वरितं तान् प्रवेशय ।

प्रतीहारी (साञ्जलिः सशिरोनतिश्च) —यदाज्ञापयति देवराजः । (प्रतीहारी निष्क्राम्यति; ततः प्रविशन्ति वायु-मधु-कामाः ।)

त्रय एव (साञ्जलयः) —जयतु जयतु देवराजः ।

देवराजः (सहर्षम् उत्थाय) —आयान्तु; आयान्तु; मम विपदि सुहृदः ! आयान्तु । (आसनानि निर्दिशति; सर्वे यथा-स्थानं तिष्ठन्ति; देवराजस्तांस्त्रीनेव दृष्ट्वा सचिन्तो भूत्वा पृच्छति) —भवन्तो भूतलात् कदा समायाताः ? मेनका च क्वास्ति ? अपि सर्वं कुशलम् ?

वायुदेवः (सस्मितम्) —देवराज ! मेनकाप्रेषिताः कुशलिनो वयं सम्प्राप्यैव समायाताः स्मः ।

देवराजः (अधीरतापूर्वकम्) —मेनका च कीदृशी ?

कामदेवः (सस्मितम्) —सा कुशलिनी वर्तते देवराज !

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

देवराजः (सोच्छ्वासम्)—हन्त ! परिजनापघातपापाद् अधुना-विधि तु सुरक्षितोऽस्मि । (ईषद् विचिन्त्य) अथ कथय सखे ! साफल्याशा वर्तते न वा ?

वायुदेवः (सस्मितम्)—देवराज ! सर्वं सम्पन्नं जानातु भवान् ।

देवराजः (सावेगम्)—विशदं ब्रवीतु वायो !

वायुदेवः (सस्मितम्)—अद्यत्वे मेनका निर्विघ्नविहाराय परित्यक्त-निजाश्रमेण विश्वामित्रेण सह सानन्दं सहचरी भूत्वा हिमगिरिरम्यप्रदेशे अनारतं भ्रममाणा प्रविशति; दिवा-निशं च तं सर्वात्मना सेवमानास्ति । विश्वामित्रोऽपि च तस्यां परमां प्रीतिमादधानोऽस्ति ।

मधुः (सस्मितम्)—अहञ्च मन्ये यत्तयोरियं प्रीतिः अति-शीघ्रं फलवती अपि भविष्यति ।

कामः (सस्मितम्)—आं देवराज ! मधुकथनं नास्ति संशया-पन्नम् । अहमत्र प्रमाणम् ।

देवराजः (सहर्षम्)—सुहृदः ! यद्येवं तर्हि तु अहं कृतार्थो जातः; (साञ्जलिः) भवतां सर्वेषां कृतज्ञतां सदाहं धार-यिष्यामि ।

त्रय एव (साञ्जलयः)—नहि, नहि देवराज ! कृतज्ञताप्रदर्शनस्य न कापि आवश्यकता । यदस्माभिः कृतम्, तत्तु अस्माकं कर्त्तव्यजातमेवासीत् ।

देवराजः (सस्मितम्)—अद्यत्वे कर्त्तव्यपालकाः सुदुर्लभाः सन्ति । अतो भवतां कृतज्ञतां सहर्षं धारयामि । अथ भवन्तो दिव्यलोकावाससुखानुभवेन भूलोकावासदुःखानुभूतिं यथेच्छं परिहरन्तु ।

त्रय एव (सचिन्तनम्)—किन्तु देवराज ! भूलोके निवसन्तो वयं दुःखानुभूतिं तु कदापि नाकुर्म ।

देवराजः (सस्मितम्)—पुनरपि दिव्यसुखानुभवः कस्य न रम्यतरः ?

त्रय एव (सस्मितम्)—यथाज्ञापयति भवान् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निष्क्राम्यति।)

(ततः पारिजातपुष्पपाणिः शची प्रविशति)

शची (सस्मितम्)—जयतु आर्यपुत्रः।

देवराजः (उत्थाय)—आगच्छ दयिते! आगच्छ।

शची सन्ध्या रम्या जायतां प्राणेश!

देवराजः (शचीं सोत्साहमाश्लिष्यन्)—आं हृदयवल्लभे! अद्यतनी सन्ध्या रम्यतरा भविता।

शची (सहर्षम्)—अस्ति कश्चिद् विशेषः?

देवराजः (सहर्षम्)—देवि! वायु-मधु-कामाः प्रत्यागत्य मेनका-विश्वामित्रयोः सम्पद्यमानं विहारं सूचितवन्तः सन्ति।

शची (सोल्लासं देवराजम् आश्लिष्यन्ती)—प्रियं प्रियतरं प्रियतमं च वृत्तमिदम्। अथावयोर्विलीना विपद्घनाः।

देवराजः (सानन्दम्)—आं देवि! अत एव तु अद्यतनी सन्ध्या रम्यतरा भविता।

शची (सोल्लासम्)—एवमेवास्तु।

(जवनिका पतति; ततश्च नेपथ्ये स्वरलहरी श्रूयते)

बाणा जयन्ति रेतिकेलियुतस्य तस्य
देवस्य विश्वविदितस्य मनोभवस्य।
रम्ये हिमालयगिरौ रतिकेलिलीना
गाधेः सुतेन रमते सह मेनकेयम्॥ १॥

तस्यां च गाधितनयो रमते ह्यजस्रं
विस्मृत्य कार्यमखिलं रमणीवरायाम्।
प्रीतिं परामुपगतौ नवदम्पती च
नक्तन्दिवं सुखततिं लषितां लभेते॥ २॥

लब्ध्वा परस्परकृतां सुखदामसीमां
प्रीतिं मनोभवभवामथ मेनकापि।
गाधेः सुतोऽपि सकलां च विहाय भूमिम्
अन्योन्यसौख्यकरणे मुदमादधाते॥ ३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(अथ शनैः शनैः जवनिका अपसरति; हिमगिरिपर्यावरणसदृशे रङ्गमञ्चे रम्यः पर्णकुटीरो दृश्यते; तदग्रभागे एकस्यां वेदिकायां मेनकाङ्के धृतशिराः शयानो विश्वामित्रो दृश्यते; मेनका च तदीयं शिरः सेवमाना नयनपथमवतरति।)

विश्वामित्रः (तथास्थित एव)—प्रियतमे! बहुभ्यो वासरेभ्यो मत्कर्णाभ्यां तावकी गीतमाधुरी नास्वादितास्ति। अनयोः कामं किं सकामं न करिष्यसि?

मेनका (सस्मितम्)—आर्यपुत्र! अतावकं न मामकं किञ्चिद्। यदीच्छसि, तर्हि शृणु—

(मेनका क्षणं विचिन्त्य गातुमारभते।)

जीवामि अहं यावत्प्रियतम
तावत्तव प्रीतिदृगस्तु मयि।
कुर्वती सदा तव सेवां स्याम्
लभमाना ते स्यां प्रेमरसम्॥
पाणौ ते करो मदीयस्स्यात्
अङ्के ते तनुर्मदीया स्यात्।
चक्षुषोश्चक्षुषी अधरे ह्यधरः
वक्षसि वक्षस्ते सततं स्यात्॥
आश्लेषसुखं तव सुलभं स्यात्
मयि प्रीतिस्ते वर्धेत सदा।
न नरो न सुरो नहि वाप्यसुरः
आवयोः प्रीतिकृन्तको भवेत्॥
यावद् भानुर्यावच्चेन्दुः
यावच्च धरा यावच्च नभः।
तावन्नौ प्रीतिकथा तिष्ठेत्
इच्छामि सखे नहि दिव्यसुखम्॥
जीवामि अहं यावत्प्रियतम
तावत्तव प्रीतिदृगस्तु मयि।
तावत्तव प्रीतिदृगस्तु मयि
तावत्तव प्रीतिदृगस्तु मयि॥ ४॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वामित्रः (सानन्दं सस्मितं च मेनकां परिरभमाणः)—
मेनके ! मम प्राणप्रिये ! एवमेव भविष्यति । आवयोः प्रीतिकथेयम् आप्रलयं प्रचरिष्यति ।

(मेनका उल्लासमनुभवति; परीरम्भं च दृढयति ।)

मेनका नाथ ! भवतो मानवता निस्सन्देहमेव देवत्वमपि अधरीकरोति मम दृष्टौ ।

विश्वामित्रः (हसन्)—नहि-नहि मेनके ! एवं नैव ब्रूहि । देवाः कोपं करिष्यन्ति ।

मेनका (सगाम्भीर्यम्)—कुर्वन्तु नाम; भवत्प्रीतये तेषां कोपमपि सहिष्ये ।

विश्वामित्रः (सस्मितविस्मयम्)—अस्त्येवम् ?

मेनका (सनिश्चयम्)—एवमेव ।

विश्वामित्रः (सहर्षम्)—साधु मेनके ! साधु । तवानेन मत्पक्षपातेन जितं सर्वथा मम हृदयम् । अत्र न संशीतिलेशो यत्तव—

अनल्पः संकल्पो हृदयगतभावोऽतिरमणः
अलभ्यं वैशद्यं मतिजनितमीड्यं बुधहरम् ।
प्रशस्यस्सन्त्यागो मम सुखमनीषानवरतं
गुणानां पुञ्जस्त्वं परमसुखभागेधि दयिते ॥ ५ ॥

मेनका (सगाम्भीर्यम्)—नाथ ! अथ तु भवत्प्रीतिपथ एव मम जीवनपथः । मन्ये, केनापि पुण्यविशेषेणैव साधारणयापि मया असाधारणस्त्वं प्राप्तोऽसि ।

विश्वामित्रः (अतीतं चिन्तयन्निव)—नहि मेनके ! अहन्तु इदं मन्ये यत्—

निमज्जतेव नौः
आतपार्त्तेनेव छाया
मरुपान्थेनेव निर्झरिणी
म्रियमाणेनेव संजीवनी
घर्मदग्धेनेव प्रावृट्
नैशान्धमूढेनेव कौमुदी

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाग्यशेषेणैव लब्धा
मया मनोदेवता त्वम् ॥६॥

(मेनका पुलकिता भवति; उभौ अन्योन्यमाश्लिष्यतः।)

मेनका —अहो उदारता तव हृदयस्य नाथ ! यदलङ्कृतस्त्वं सर्षपसमं मम गुणं तु सुमेरुमिव महान्तं मन्यसे; किन्तु सुमेरुमिव महान्तमपि दुर्गुणं सर्वदैव उपेक्षसे।

विश्वामित्रः नहि मेनके ! त्वयि दुर्गुणस्य अणुरपि नास्तीति अहं जाने। अत एव तु त्वया सह गार्हस्थ्यधर्मे प्रविष्टोऽस्मि।

मेनका —नाथ ! त्वया समं गार्हस्थ्यसुखमनुभवन्ती अहन्तु आत्मानं धन्यतमां मन्ये।

विश्वामित्रः मेनके ! अपि जानासि यद् गार्हस्थ्यधर्ममहीरुहस्य फलं सन्ततिर्भवति ?

मेनका —(सस्मितम्)—जानामि आर्यपुत्र ! जानामि; तदेव च प्रतिक्षणं प्रतीक्षमाणास्मि।

विश्वामित्रः (सस्मितम्)—एवमस्ति ?

मेनका —(सलज्जम्)—एवमेव।

(नेपथ्ये)

उपेक्षितानां परिखिन्नचेतसां
तपस्यतां शिक्षितुमिच्छुकात्मनाम्।
नृणां विकासे यदवाप्यते यशो
न लभ्यते तत्स्वकुटुम्बपोषणे ॥७॥

विश्वामित्रः (श्रुतिमभिनीय)—मेनके ! शृणोषि ?

मेनका (सगाम्भीर्यम्) शृणोमि; प्रतीयते यदेष कश्चिद् यशस्कामः।

विश्वामित्रः (मेनकाधरम् अङ्गुल्या सस्मितं संस्पृशन्)—कान्ताधरामृतास्वादसुखापरिचितश्च।

(मेनका स्मयते। पुनः नेपथ्ये प्राश्निकस्वरेण)

 CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कः कोऽत्र प्रतिवसति भोः ? ···कः कोऽत्र प्रतिवसति भोः?

विश्वामित्रः (श्रुतिमभिनीय) – मेनके! अयं स्वरस्तु परिचितः प्रतीयते!

मेनका तर्हि गत्वा ज्ञायतां कोऽस्ति ?

(पुनः नेपथ्ये)

अपि मे सुलभो भविष्यत्यत्र रात्रिविश्रामः ?

विश्वामित्रः —अयं तु अत्र रात्रौ विशश्रमिषुरस्ति ?

मेनका अतिथिसत्कारे मम न कापि विप्रतिपत्तिः। अथ चायमावयोर्धर्मोऽपि; यतो हि आवां गृहस्थौ स्वः (स्मयते।)।

विश्वामित्रः (सहर्षम्)—साधु दयिते! साधु। त्वत्तोऽहमिदमेव समाशासे।

मेनका —(सस्मितम्)—अथ याहि; गत्वा च तमतिथिविशेषं स्वपरिचितं च समानमानय।

विश्वामित्रः (सहर्षम्) —बाढम्।

(विश्वामित्रो गन्तुमुपक्रमते; तावदेव प्रविशति कमण्डलुपाणिः मृगचर्मकक्षो रुद्राक्षस्रक्कण्ठः कण्वः।)

कण्वः (विश्वामित्राभिमुखीभूय) बन्धो ! किमत्र आतिथ्यं सुलभम् ?

विश्वामित्रः (सहर्षम्) —अवश्यमेव; आगम्यताम्; स्वागतं भवतः।

कण्वः धन्यवादो भवते।

विश्वामित्रः (कण्वं निपुणं निरूप्य परिचित्य च सोल्लासम्)—हन्त भो बन्धो ! भवांस्तु मम सखा महर्षिकण्वोऽस्ति; (कण्वः ईषद् विस्मयते।) अपि न परिचिनोषि मां स्वीयं सखायं विश्वामित्रम् ? स एवाहम्।

कण्वः (सविस्मयं सानन्दं च)—हन्त भोः सखे ! विश्वामित्र ! त्वमत्र कुतः ?

(उभौ सत्वरं सोल्लासं सानन्दं च परस्परमाश्लिष्यतः।)

विश्वामित्रः (कुटीराभिमुखीभूय)—मेनके ! अयि मेनके ! आगच्छ;

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वरितमागच्छ; पश्य, मम सखा महर्षिः कण्वः समायातोऽस्ति ।

मेनका (सहर्षमागत्य कण्वं प्रति साञ्जलिः)—आर्य ! अभिवादये ।

कण्वः (दक्षिणपाणिमुत्थाप्य)—चिरं जीव ।

विश्वामित्रः (कण्वं प्रति)—आगच्छ; इतः समुपविश (आसनं निर्दिशति ।)

(सर्वे यथास्थानं समुपविशन्ति ।)

कण्वः (कुटीरं निपुणं विलोक्य)—सखे ! विश्वामित्र ! किमेष कुटीरो भवतः ?

विश्वामित्रः (सस्मितम्)—एवमेव मित्र !

(मेनका ईषद् चिन्तिता भवति ।)

कण्वः स्वीयः पुरातनः आश्रमः कस्मै निमित्ताय परित्यक्तः ?

विश्वामित्रः (मेनकां मनागालोक्य)—गार्हस्थ्यसुखोपभोगाय ।

कण्वः (सविस्मयम्)—मित्र ! इदं किमहं श्रृण्वन्नस्मि ?

विश्वामित्रः (सस्मितम्)—आं मित्र ! (मेनकां निर्दिशन्) इय मेनकास्ति; मदीया सहधर्मचारिणी । एनयैव सह सम्प्रति गार्हस्थ्यसुखमनुभवन्नस्मि । (कण्वो मेनकां सविशेषं पश्यति; मेनका लज्जां नाटयति ।) एतदर्थमेव आश्रमं स्वशिष्याय देवलाय समर्प्य एनां नीत्वा निर्गतोऽत्र प्रतिवसामि । (कण्वो गम्भीरो भवति ।) साम्प्रतम् अहं सर्वथैव सुखी अस्मि । (मेनका कण्वस्य प्रतिक्रियाज्ञानार्थं तं निरीक्षितुं प्रवर्तते ।)

कण्वः (सगाम्भीर्यम्)—विश्वामित्र ! भवता तपस्त्यक्तमिति विज्ञाय विस्मये ।

विश्वामित्रः (सदार्द्र्यम्)—मित्र ! मया बहु तपस्तप्तम् । तावता तपसा मदीयं व्यक्तित्वं लोके पर्याप्तरूपेण प्रथितमस्ति । अतोऽग्रे तस्यावश्यकतां न पश्यामि । यतो हि 'व्यक्तित्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विकासाय एव तपो विधेयम्' इत्यहं मन्ये; अपि च सिद्धे साध्ये साधनं त्याज्यमेव ।

(मेनका हर्षमनुभवति ।)

कण्वः विश्वामित्र ! तपःफलप्राप्तिकाले भवता तपस्त्यक्तम्, इति विलोक्य चिन्तितोऽस्मि ।

विश्वामित्रः (झटिति) - नहि मित्र ! मया तपःफलं प्राप्तं प्राप्यमाणं चास्ति ।

कण्वः (सविस्मयम्)—किन्त्वद्भुवतस्तपःफलम् ?

विश्वामित्रः (सस्मितं मेनकापाणिं गृहीत्वा)—मद्व्यक्तित्वप्रभाविता मनोवाक्कायैः मां सेवमाना इयं मेनका एव मत्तपःफलम् ।

(मेनका लज्जां नाटयति ।)

कण्वः (सस्मितम्)—मित्र ! तपःफलं रमणीलाभो न भवति ।

विश्वामित्रः (सधैर्यम्)- तर्हि किं भवति ?

कण्वः सुखम्; अनन्तसुखम्; मोक्षलाभश्च ।

विश्वामित्रः सुखस्य चास्य संसारे मूलाधारः कोऽस्ति, यमाश्रित्य सुखोपभोगः कर्तुं शक्येत ?

(कण्वश्चिन्तयितुमारभते; विश्वामित्रश्च स्मयते ।)

कण्वः ?···?···?

विश्वामित्रः (सस्मितम्)—मित्र ! संसारेऽस्मिन् रूपशीलमेधा-सेवादिसद्गुणसम्पन्ना समर्पितात्मदेहा रमणी एव सुखस्य मूलाधारोऽस्ति—

रमणी जननीव विभोजयते
सचिवेन समा सह मन्त्रयते ।
भृतिकेव शुभा सततं भजते
रतिदा निशि सौख्यततिं तनुते ॥८॥

अपिच—

रमणी तनुखेदमपाकुरुते
रमणी मनसे सुखमर्पयते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इतरे निजलाभकृतेऽत्र परं
रमणी पतिसौख्यरतैव सदा ॥९॥

(मेनका हर्षमनुभवति।)

कण्वः पुनरपि सखे ! लोकः किं कथयिष्यति ?

विश्वामित्रः (सदार्द्र्यम्)—अप्रियं किमपि न कथयिष्यति। यतोहि सकलोऽयं संसारो विवाहाधारः; इयं च मम गान्धर्व-विधिना परिणीता पत्नी; अत एव आवयोः सम्बन्धे अप्रियकथनाय लोको न सावकाशः।

(मेनका उल्लसति।)

कण्वः (सनिर्वेदम्)—सखे ! विश्वामित्र ! भवता मुमुक्षापि परित्यक्ता ?

विश्वामित्रः (सोत्साहम्)—आं मित्र ! यतोहि 'मुमुक्षा मुमूर्षायाः पर्यायोऽस्ति' इत्यहं मन्ये। अतएव महाज्ञानी विरञ्चिः, महामतिर्विष्णुः, महायोगी च महेश्वरोऽपि मुमुक्षवो न सन्ति। अपितु विरञ्चिः सरस्वत्या, विष्णू रमया, महेश्वरश्च उमया सह सानन्दं रमते।

कण्वः (सचिन्तम्)—?···?···?

विश्वामित्रः (सस्मितम्)—मित्र ! भवांस्तूष्णीं कथमास्ते ? यदुचितं मन्यते, तत्कथयतु।

कण्वः (दीर्घं निःश्वस्य)—सखे ! किं कथयानि ? भवत-स्तर्ककर्त्तने आत्मनि असामर्थ्यम् अनुभवामि।

विश्वामित्रः (हसन्)—यद्येवमस्ति, तर्हि भवानपि स्वीयं वैखानसं व्रतं तथा मुमुक्षामोहमपहाय कामपि मनोरमां जीवनसहचरीं लभताम्।

कण्वः (सस्मितम्)—नहि, नहि। अहमेवम्भूत एव सुखी अस्मि।

विश्वामित्रः अस्तु नाम। यथा रोचेत, तथैव विधेयम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कण्वः (सनिर्वेदम्)—आं बन्धो ! एतादृशसुखलाभाय मम साहसमेव न भवति ।

विश्वामित्रः (सस्मितम्)—जानामि; अस्तु नाम, त्यज्यतामेष प्रसङ्गः । अथ कथ्यतां साम्प्रतं भवता कुत आगम्यते ?

(मेनका निश्चिन्ता बोभूयते ।)

कण्वः (सदुःखम्)—मित्र ! ह्यो ममानुपस्थितौ पञ्चदशवर्षदेशीयो मदीयः एकः शिष्यः अन्येन स्वीयेन सतीर्थ्येन सह कलहं कृत्वा मद्भ्याद् आश्रमं परित्यज्य निर्गतोऽस्ति । अद्य तमेव सर्वं दिनम् अन्विष्यन्नहमिदानीमत्र सम्प्राप्तोऽस्मि ।

विश्वामित्रः (ससंवेदनम्)—अपि लब्धं क्वचित् तद्वृत्तजातम् ?

कण्वः (सनिराशम्)—नैव ।

मेनका (सजिज्ञासम्)—तात ! किंवयाः कथितः सः ?

कण्वः (मेनकां पश्यन्)—देवि ! पञ्चदशवर्षदेशीयोऽस्ति सः । अपि भवत्याः दृष्टिपथमायातोऽस्ति एतद्वयाः कश्चिद् गैरिकवसनः ?

मेनका (सोत्साहम्)—आं तात ! अद्य अपराह्णे मालिनीतीरे नीरानयनप्रवृत्तया मया एवम्भूत एव एको बालको दृष्टः आसीत् ।

कण्वः (सौत्सुक्यम्)—अपि तद्विषयेऽपि किमपि ज्ञातमस्ति ?

मेनका मां जलकलशभारपीडिताम् इव अनुमाय मम समीपमागत्य तेन मदीयं साहाय्यमपि कर्त्तुं निवेदितमासीत् । परं सधन्यवादं मया निवारितः सः । वृक्षमूले अवस्थाय तत्र पतितं फलं सतृष्णमादाय तदशितुं प्रवृत्तः ।

विश्वामित्रः (सवात्सल्यम्)—वराको बुभुक्षितो भवेत् ? त्वया कुटीरे समाहूय तस्मै भोजनं दातव्यमासीत् ।

मेनका भवान् उचितमुदीरयति । तमेवं तत्फलं खादन्तं वीक्ष्य 'क्षुधितोऽयम्' इति अनुमाय वात्सल्याभिभूता अहमपि भोजनार्थं तं स्वकुटीरे आगन्तुम् अकथयम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वामित्रः उचितमकरोः ।

(कण्वो वेदनाशे अनुभवति ।)

मेनका किन्तु स आगच्छदेव नहि ।

विश्वामित्रः मन्ये, स्वाभिमानी सः ।

मेनका यदा मया बहुवारं स कथितः, तदा तेन कृतज्ञेनेव कथितं यद् 'परमावश्यकतायां सत्याम् आगमिष्यामि ।'

कण्वः मित्र ! मेनकादेव्याः इमां वार्तां निशम्य मम मनस्तं बालकं मृगयितुम् इदानीमेव मालिनीतीरं यातुं मां नुददस्ति ।

विश्वामित्रः (ईषद् विचिन्त्य)—बन्धुवर ! इदानीं तिमिरं प्रवर्धमानमस्ति; अतः साम्प्रतं तत्र गमनं न साम्प्रतम् । अथ च परमावश्यकतायां सत्यां तेनात्र आगमनं प्रतिश्रुतमेव । पान्थाय इतस्ततो वा आहिण्डमानाय जनाय विशेषतो बालकाय रजनीमुखे निरापदास्पदस्य परमावश्यकता बोभूयते एव । अतः इदानीं तस्यात्र आगमनं सम्भवति । अस्माभिरिदानीं परमेश्वरः प्रार्थयितव्यो यत्स तं बालकम् अत्रागन्तुं प्रेरयेत् ।

मेनका (ससंवेदनम्)—आं तात ! भवत्सुहृत् समयोचितम् उदीरयति ।

कण्वः (सदैन्यम्)—उचितमस्ति; यथा भवद्भ्याम् उच्यते । कदाचित् ईश्वरसम्प्रेरितः स आगच्छेदेव ।

(नेपथ्ये)

अहमागतोऽस्मि मातः ! अहमागतोऽस्मि । मातः ! ··· मातः ! ! ···मातः ! ! ! अहमागतोऽस्मि ।

(सर्वे श्रुतिमभिनयन्ति ।)

कण्वः (ससम्भ्रमम्)—मित्र ! अयं स्वरस्तु शार्ङ्गरवस्यैव ।

विश्वामित्रः (सत्वरम्)—कोऽयं शार्ङ्गरवः ?

कण्वः स एव, यं मृगयमानोऽस्मि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनका (विचिन्त्य)—अयमेव च स बालको यो मया मालिनी-तीरे दृष्टः।

कण्वः (नेपथ्याभिमुखम्)—वत्स शार्ङ्गरव ! शार्ङ्गरव !! (विश्वामित्रः कण्वं संकेतेन आह्वानाद् वारयति; स्वयं च उत्थाय बहिर्गन्तुम् उपक्रमते; मेनका च तमनुसरति; तावत् प्रविशति वैखानसवेषः शार्ङ्गरवः।

शार्ङ्गरवः (साञ्जलिः)—मातः ! भवत्या निमन्त्रितोऽहं समागतोऽस्मि।

विश्वामित्रः (सहर्षम्)—आगच्छ वत्स !

मेनका (सोल्लासम्)—आगच्छ वत्स ! आगच्छ; त्वमेव प्रतीक्ष्यमाणोऽसि।

कण्वः (सहर्षम् उत्थाय सवात्सल्यम्)—वत्स शार्ङ्गरव ! क्वासीस्त्वम् ?

शार्ङ्गरवः (कण्वं वीक्ष्य ससम्भ्रमं सत्वरं च तदभिमुखीभूय)—गुरुदेव ! क्षम्यतामयं दासः (इत्युक्त्वा तच्चरणयोः स्वशिरो निदधाति।) अथ न कदापि एवं करिष्यामि (इत्यभिधाय साश्रुनयनो भवति।)

कण्वः (सस्नेहं तमुत्थापयन्)—उत्तिष्ठ वत्स ! उत्तिष्ठ ! त्वया आश्रमो नैव त्यक्तव्य आसीत्। त्वामन्विष्यन् अहं क्व क्व न भ्रान्तोऽस्मि ?

शार्ङ्गरवः (उत्थाय साञ्जलिः)—भगवन् ! अपराधो जातः; क्षमामीहे।

कण्वः (स्वीये शार्ङ्गरवीये च नेत्रे प्रमृज्य)—वत्स ! प्रसन्नोऽस्मि; मनःखेदं परित्यज; अथ च पश्य (विश्वामित्रं दर्शयन्) अयं मम सखा महर्षिः विश्वामित्रोऽस्ति; (मेनकां दर्शयन्) इयं चास्य पत्नी मेनका देवी अस्ति; एनौ अभिवादयस्व।

शार्ङ्गरवः (सहर्षम्)—प्रणमामि भगवन् ! (इत्यभिधाय विश्वामित्र-चरणयोः शिरो निदधाति।)

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वामित्रः (सहर्षं तमुत्थाप्य)—चिरं जीव वत्स !

शार्ङ्गरवः (साञ्जलिः)—मातः ! प्रणमामि । (इत्यभिधाय मेनकाचरणयोः शिरो निदधाति ।)

मेनका (सानन्दं सत्वरं च तमुत्थाप्य)—वत्स ! सदैव सुखी भव ।

विश्वामित्रः मेनके ! अत्यन्तं शुभोऽद्यतनो दिवसः ।

मेनका (सहर्षम्)—नात्र संशीतिलेशः ।

विश्वामित्रः तर्हि सशिष्यस्य मदीयमित्रस्य आतिथ्यविधाने स्वीयं सम्पूर्णं पाककर्मकौशलं प्रकटीकुरु । तावद् वयं वार्ताः कुर्महे ।

मेनका (सोल्लासम्) एवमेव ।

कण्वः देवि, मेनके ! भोजने वैविध्यस्य आवश्यकता नास्ति । यथाशीघ्रं किमपि उदरपूर्त्तये दीयताम् । भवत्या परिवेषितं सर्वमेव सुधायिष्यते (हसति ।)। अथ च मया श्वः प्रभाते एव (शार्ङ्गरवं वीक्ष्य) इमं नीत्वा स्वाश्रमोऽपि तु गन्तव्योऽस्ति ।

मेनका (सविस्मयम्)—सुचिरान्मिलितं स्वीयं प्रियं सखायं विहाय भवान् एतावच्छीघ्रं प्रस्थास्यति ?

कण्वः विहाय कथम् ? (विश्वामित्रं वीक्ष्य सस्मितम्) अथ तु आवां प्रायेण मेलिष्यावः । इतः समीपे एव तु एकस्मिन् योजने मालिनीतीरे एव ममाश्रमोऽस्ति ।

विश्वामित्रः मेनके ! आवामनादृत्य अयं न यास्यतीति अहं जाने । गत्वा स्वादिष्ठं पच ।

मेनका (सोल्लासम्)—एवमेव; तावन्मार्गश्रमापनोदार्थं पयः समानयामि ।

विश्वामित्रः (सोत्साहम्)—बाढम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कण्वः (शार्ङ्गरवं प्रति)—वत्स, शार्ङ्गरव ! गच्छ, स्वमातृकल्पायाः मेनकादेव्याः साहाय्यमाचर।

शार्ङ्गरवः (सहर्षम्)—या आज्ञा।

(मेनका शार्ङ्गरवश्च उत्थाय कुटीराभ्यन्तरे प्रविशतः; शनैः शनैश्च जवनिका प्रसरति।)

॥ इति पञ्चमोऽङ्कः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

।। षष्ठोऽङ्कः ।।

(नेपथ्ये)

सखि ! त्वं क्वासि ? कदा चायास्यसि ?
विना त्वां नहि लगति मनो मे, भ्रमति चिन्तितं सततम्;
केन हेतुना कुत्र प्रयाता ? किं सुखिता दुःखिता वा ?
(ततो जवनिका शनैः शनैरपसरति; तथा दिव्योद्यानी-
भूते मञ्चे मणिशिलासीना सवीणा गायन्ती रम्भा
दृश्यते ।)—

दश मासा जाताः अधुना ते कापि न वृत्तिरवाप्ता;
पृष्टा नैके, किन्तु न कश्चित् शक्रविभीतो ब्रूते ।।
सखि ! त्वं क्वासि ? कदा चायास्यसि ?
इन्द्रप्रेरिता गतेति जाने, ततः परं नहि जाने;
स्वर्गराज्यसुखरक्षणसवने हा किं बलीकृतासि ?
हा धिग् दास्यं धिङ् नारीत्वं हा धिग् दिव्यविधानम्;
देवी यत्र अप्सरा विहिता सामान्या सुरतन्त्रा !
सखि ! त्वं क्वासि ? कदा चायास्यसि ? ।।१।।

(ततः प्रविशति उर्वशी ।)

उर्वशी (रम्भामालोक्य सहर्षम्)—सखि रम्भे ! त्वमत्रासि ! अहं त्वां मेलितुं तव गेहं गतासम् । (रम्भा उर्वशीं विलोक्य गीताद् विरमति; वीणामेकतः स्थापयति; उर्वशी तस्याः समीपे आगत्य तिष्ठति; पुना रम्भां सविशेषमालोक्य) रम्भे ! त्वमद्य खिन्नेवावलोक्यसे; ··· किमस्य कारणम् ?

रम्भा (उच्चैः निःश्वस्य)—हला उर्वशि ! अद्य पारतन्त्र्य-विषदग्धा स्वीया सखी मेनका मम स्मृतिपथमागतास्ति । न जाने सा वराका इदानीं कस्यामवस्थायां भवेत् ?

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उर्वशी (सनिश्चमम्)—असौ सौभाग्यवती अस्ति ।

रम्भा (सौत्कण्ठ्यम्)—सत्यम् ? अपि जानीषे त्वम् ?

उर्वशी (सशिरःकम्पम्)—आम्; अद्य ज्ञातवती अस्मि ।

रम्भा (सोत्साहम्)—शीघ्रं मामपि बोधय; क्वास्ति सा ?

उर्वशी सखि ! जाने ते तस्यां प्रीतिम्; अत एव तद्विषयकज्ञाना-नन्तरमेव त्वां बोधयितुं तव गेहं गतासम्; परन्तु त्वन्तु अत्रासीः ।

रम्भा (सौत्सुक्यम्)—सखि ! भूमिकां विहाय वेदनीयं वेदय ।

उर्वशी (सस्मितम्)—अच्छा, शृणु—अद्याहं शचीदेवीं सभा-जयितुम् अगच्छम्; ततो हर्षमनुभवन्त्या तया देव्या अहमबोधिषं यन्महर्षि विश्वामित्रं स्वरूपसम्पदा योग-विरतं भोगरतं च कर्तुं देवराजेन प्रेरिता मेनका स्वनि-योगे फलवती जातास्ति; (रम्भा विस्मयं नाटयति ।) यतोहि अतीते एव पक्षे तस्यां विश्वामित्रात्मजा जातेति देवर्षिनारदमुखाद् ज्ञातमस्ति ।

रम्भा (सदीर्घनिःश्वासम्)—हा हन्त ! रूपसम्पत्तेः अयं दुरुप-योगः × × × अथाग्रे कथय ।

उर्वशी अग्रे तया बोधितं यदथ मेनकामत्र समानेतुं वायुदेवः प्रेषितोऽस्तिः ।

रम्भा (सवैवश्यम्)—येन तदीयस्य रूपराशेः कमपि तपस्विनं मोहयितुं भूयो दुरुपयोगो विधातुं शक्येत ! × × × हा हन्त ! कीदृशोऽयं दुराचारः ?

उर्वशी (चिन्तयित्वेव)—सखि ! यदि मेनका स्वाभाविकरूपेण विश्वामित्रं प्रति अनुरक्ता भूता भवेत्, तदा तु तस्या अत्रानयनं वस्तुतस्तां प्रति देवराजस्य अत्याचार एव भविष्यति ।

रम्भा (सस्मितम्)—विश्वामित्रात्मजां जनयित्वा मेनका तस्मिन् स्वीयां स्वाभाविकीं प्रीतिं साधितवती अस्ति; अत्र संशयो नैव कार्यः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

उर्वशी (सशिरःकम्पम्)—उचितं लक्षितं त्वया; तर्हि तु मम मतेन पतिवियोगवह्निः देवराजेन तस्यां नैव प्रक्षेप्तव्यः।

रम्भा किन्तु अहं जाने यद् देवराजः स्वार्थपूर्त्तये मेनकां स्वसमीपे रक्षितुं तां न केवलं पतिवियुक्तामेव करिष्यति; अपितु स सन्ततिहीनामपि विधास्यति।

उर्वशी (सदुःखम्) सखि! सत्यमुक्तं त्वया; (विचार्येव) देवराजस्य नैष्ठुर्य्येण अहमपि पीडितास्मि।

रम्भा तदहं जानामि। परं किं विधीयेत?

उर्वशी (सेषद्भ्रूभङ्गम्)—किमपि तु विधेयमेव; अस्मन्निष्ठानां रति-वात्सल्यादिस्थायिभावानामपि आविर्भाव-तिरोभावौ देवराजाधीनौ स्याताम्, इति तु असह्यं प्रतिभाति।

रम्भा त्वं समीचीनं ब्रूषे; एतादृशस्य शोषणस्य तु विरोधोऽपि विधेयः।

उर्वशी किन्तु किमुक्त्वा?

रम्भा इदमेव यद् देवराजः स्वपदरक्षणार्थम् अस्मान् दुरुपयुङ्क्ते; तेन बलिभ्य इव तपस्विभ्योऽपि स्वपदरक्षा आत्मबलेन एव विधेया; न तु अस्मन्निष्ठरत्यादिस्थायिभावानां छलच्छद्मयुतेन दुरुपयोगेन। यतोहि—का नो हानिर्यदि कश्चिद् अन्यस्तदधिकस्तपःपूतात्मा इन्द्रो भवेत्?

उर्वशी (सस्मितम्)—साधीयसीयं युक्तिः।

रम्भा (सनैराश्यम्)—युक्तिस्तु साधीयसी; किन्तु एतदर्थम् अस्माकं सर्वासामेव अप्सरसां संगठनं परमावश्यकम्। तदभावे युक्तिरियं वन्ध्या।

उर्वशी (सोत्साहम्)—संगठनं विधास्यते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रम्भा (सनैराश्यम्)—उर्वशि ! अस्माकं संगठनम् असम्भवम्। यतोहि विरोधाभिव्यक्तिवेलायां देवराजात् शापसम्प्राप्ति-सम्भावनाभीतिभीता वयं संगठिता भवितुं न शक्नुमः।

उर्वशी पुनरपि यत्नस्तु विधेय एव।

रम्भा (सस्मितम्)—अस्माकं यत्नारम्भोऽपि मूषिकाणां मार्जारगलघण्टिकाबन्ध इव।

उर्वशी (सनिःश्वासम्)—आः, तर्हि का गतिः ?

रम्भा (सदैन्यम्)—न कापि। (उर्वशीमालोक्य) हला उर्वशि ! साम्प्रतं प्रकृतिस्था भव; एहि चाथ आवासं चलेव; मेनकायाश्चागमनं प्रतीक्षे वहि।

उर्वशी (क्षीणोत्साहेव)—एवम्; चल, चलेव।

(उभे निष्क्राम्यतः।)

॥ इति विष्कम्भकः ॥

(ततो द्वौ वैतालिकौ प्रविशतः।)

प्रथमः मित्र ! ऋतंवद ! अपि जानीषे ? य —
आनेतुं किल मेनकां मघवता सम्प्रेषितो यो मुदा
वायुस्सोऽस्ति समागतो नतशिराः किन्त्वागता नैव सा।
तेनावाप्तविमाननोऽमरपतिः क्षोभं परं प्राप्तवान्
उद्यानं त्वरितं विचिन्तनपरो यातोऽस्ति शच्या समम् ॥२॥

ऋतंवदः जानामि सखे प्रियंवद ! जानामि; किन्तु देवराजस्य कोपोऽयम् औचतीं न विभर्त्ति ! यतोहि—
विश्वामित्रमुनिं पतिं वृतवती, पत्नी तदीयाधुना
गेहे वाससमौ सदा विदधती तस्यात्मजायाः प्रसूः।
वात्सल्येन युता तथा पतिरता भावद्वयेनाप्लुता
नायातापि न दृश्यते मम मते दोषास्पदा मेनका ॥३॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रियंवदः (साशङ्कं निवारयन्) –मित्र ! मैवं ब्रूहि । यदि कश्चिदाकर्णयेत्, देवराजं च कथयेत्, तर्हि नौ महाननर्थः सम्भवेत् ।

ऋतंवदः (सचिन्तम्) —बाढम् ।

प्रियंवदः एहि, देवराजमनुसरावः ।

ऋतंवदः बाढम् ।

(उभौ निष्क्राम्यतः ।)

।। इति प्रवेशकः ।।

[ततः शचीद्वितीयो देवराजः प्रविशति ।]

शची (इन्द्रं परिबोधयन्ती) —आर्यपुत्र ! अमर्षं त्यजतु; यदि मेनका विश्वामित्रं सत्यमेव पतित्वेन अङ्गीकृतवती; तथा तेनैव सह निवस्तुं निश्चितवती; तर्हि को दोषः ? वसतु नाम सा तत्रैव ।

इन्द्रः [सभ्रूभङ्गम्] नहि देवि ! त्वम् ऋजुहृदयासि; अतो मेनकापराधं न पश्यसि । तया अत्रानागत्य मामको महानपमानो विहितोऽस्ति । अहमिमं कथमपि न सहिष्ये ।

शची पतिं विहाय कथमत्र समागच्छेत्सा वराकी ?

इन्द्रः अप्सरसो न कोऽपि पतिर्भवति ।

शची कथम् ? किमप्सराः नारी न भवति ?

इन्द्रः सा दासी भवति ।

शची [सस्मितम्] —किं दासी न भवति नारी ?

इन्द्रः [व्यग्रतापूर्वकम्] –भवति; किन्तु किमनेन ?

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शची [सस्मितम्]—अनेन इदम्, यत् यदा काचिन्नारी पतिं वृणोति, तदा सा तमेव निकषा निवस्तुमीहते; सर्वो लोकः इदमनुमनुते। अनया लोकदृष्ट्या मेनकायाः विश्वामित्रेण सह निवासनिश्चयः समीचीन एव।

इन्द्रः किन्तु मया सा विश्वामित्रं तपसो भ्रंशयितुं प्रेषितासीत्, नतु पतित्वेन वरीतुम्।

शची (सस्मितम्]—विश्वामित्रं तपसो भ्रंशयित्वा तया भवदादेशस्तु पालित एव।

इन्द्रः स पतित्वेनापि तु वृतः!

शची किमनेन?

इन्द्रः अनेन ममापमानस्तथा एतादृशेष्वेव तपोभञ्जककार्येषु शक्तिह्रासः।

शची [सस्मितम्]—रम्भा-तिलोत्तमादयो नैकाः अप्सरसः सन्त्येव स्वर्गलोके; तासु सतीषु कथं भवतः शक्तिह्रासः?

इन्द्रः यदि ता अपि क्रमेण मेनकामनुसरेयुस्तदा एकस्मिन् दिवसे मम शक्तिह्रासः सुनिश्चितोऽस्ति। अतएव मया मेनकात्र बलादानेतव्या भविष्यति; येन अन्या अपि एवं कर्त्तुं साहसं न लभेरन्।

शची आर्यपुत्र! एवं कृते तु नारीत्वं प्रति अन्यायो भविष्यति।

इन्द्रः भवतु नाम।

न्यायान्यायावनालोच्य शास्ता स्वार्थं प्रपूरयेत्।
देवाधिपत्यरक्षार्थं मया सर्वं करिष्यते॥ ४॥

शची तथापि नारीषु तपस्विषु च बलप्रयोगो न शोभते।

इन्द्रः तपस्विषु तु बलप्रयोगस्तेषां शापभयान्न विधीयते; किन्तु नारीषु बलप्रयोगे का हानिः?

शची शालीनता नश्यति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इन्द्रः शालीनता पदवीतो न बृहत्तरा ।

शची अहं मन्ये यदस्मिन् मेनकापहरणरूपे असत्कार्ये कश्चिदपि देवो भवत्साहाय्यं न विधास्यति ।

इन्द्रः देवि ! एष ते भ्रमः ; वायुनानुगम्यमानोऽहं श्व एव मेनकामाहरिष्यामि ।

शची (वैवश्यमनुभवन्ती)—यदि भवान् मेनकाहरणाय बद्धपरिकर एव जातोऽस्ति, तर्हि तस्याः सद्योजाता आत्मजापि तया सह समानेया । पतिविरह विधुरीकृता वराकी वात्सल्यसुखमेव समनुभवितुं शक्नुयात् ।

इन्द्रः (सकाठोर्य्यम्)—इदं न सम्भवम् ।

शची (सभ्रूभङ्गम्)—कथम् ?

इन्द्रः अविहितपर्याप्तपुण्या मानवसन्ततिः देवलोकप्रवेशं नार्हति ।

शची (सेषत्कोपम्)—आः ! धिगिमं नियमम्, यः स्तनन्धयामपि सन्ततिं मातुर्विच्छेदयति (गन्तुमुपक्रमते ।) !

इन्द्रः देवि ! तिष्ठ ; अहमपि तु चलिष्यामि ।

शची (सदैन्यम्)—नहि ; अपारं पुरुषपारुष्यं प्रेक्ष्य पीडिताहं विश्रामं समीहे (इति कथयन्ती निष्क्राम्यति ; इन्द्रो व्यग्रो भवति ।) ।

(ततो वायुः प्रविशति ।)

वायुः (अभिवादनमुद्रायाम्)—जयतु देवराजो जयतु ।

इन्द्रः वायुदेव ! उचितावसरे भवानागतोऽस्ति ।

वायुः मह्यं भवतः को निदेशोऽस्ति ?

इन्द्रः मेनकामानमर्दनाय तस्या अत्राहरणं परमावश्यकं प्रतिभाति । अतो भवान् तदपहरणे मम सहायको भूत्वा श्वो मया सह चलिष्यति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वायुः (शिरो नम्रीविधाय)—यथा आज्ञापयति भवान् ।

इन्द्रः (सस्मितम्)—तर्हि आगम्यताम् ; अद्य सोमपानं मयैव सह विधीयताम् ।

वायुः (सस्मितम्)—अहो भाग्यम् ! चलतु ।

(उभौ निष्क्राम्यतः, पटी च प्रसरति ।)

इति षष्ठोऽङ्कः

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सप्तमोऽङ्कः

(ततो बाह्यजवनिका अपसरति ; वायुनानुगम्यमानो देवराजः इन्द्रः प्रविशति ।)

इन्द्रः (चिन्तयन्)—वायुदेव ! विश्वामित्रे पश्यति सति मेनकाहरणं किञ्चित् कठिनं प्रतिभाति ।

वायुः स्वामिन् ! चिन्ता परित्यज्यताम् ; ह्यो मेनकया सह संजातवार्तालापानुसारं तु सोऽद्य कण्वाश्रमान्मध्याह्नकाल-पर्यन्तमेव समायास्यति ; (आकाशं पश्यन्) इदानीं च दिनस्य प्रथम एव यामो न व्यतीतोऽस्ति ।

इन्द्रः (प्रसीदन्)—एवञ्चेत्तर्हि तु निर्विघ्ना नो योजना ।

वायुः आं देवेश । निर्विघ्ना एव भवद्योजना ; अथ च मेनकायाः कुटीरोऽपि समीपे एवास्ति । दृश्यताम्, स दृश्यते (अङ्गुल्या मञ्चकोणं निर्दिशति ।) ।

इन्द्रः (विलोकयन्)—एहि वायो ! विश्वामित्रागमनात्पूर्व-मेव समीहितं साधयावः ।

वायुः यदाज्ञापयति देवराजः ।

(उभौ निष्क्राम्यतः ।)

(ततः आभ्यन्तरजवनिका अपसरति ; आत्मजामुप-लालयन्ती मेनका अवलोक्यते ।)

मेनक (दोलाशयानाम् आत्मजां लालयन्ती)—

त्वमावयोः प्रीतिफलं मनोहरम्
अमन्द आनन्दरसश्च तोषलः ।
यशश्चिरं प्राप्नुहि भूतलेऽखिले
त्वया ममापीह चलेत्परम्परा ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इयं धरा द्यौरियमायता सती
उभे च सन्ध्ये च दिशश्च निर्मलाः ।
खगा मृगाः कीटकृकादिजन्तवो
ह्यवन्तु च त्वां मुनयश्च सर्वदा ॥ २ ॥

(आत्मजां चोचुम्ब्यते ; सहसा वामेतराक्षिस्पन्दनं नाटयित्वा)—आः किमिदम् ? अद्य मदीयं वामेतरन्नयनं किमर्थं स्पन्दते ? (आकाशे दृष्टिं दत्वा)—जगदाधार ! दयानिधे ! दया विधेया मम गार्हस्थ्ये ।(अस्मिन्नेव समये कुटीरद्वारदेशस्थिते 'हल्दु' संज्ञे महीरुहे कश्चिन् मार्जारः शावकपोषणलग्नां विहगीं मुखेनादाय पलायते ; तस्याः करुणक्रन्दनं वातावरणं व्याप्नोति ; एतेन मेनका चिन्तिता भवति ; तन्मनसि वायुदत्तो देवराजसन्देशः प्रस्फुरितुम् आरभते ; तदनु सा स्वीयामात्मजां प्रगाढेन वात्सल्येन शिरसि चिरं जिघ्रति ; पुनर्गम्भीरा भवति ; आत्मगतं च विचारयति)—मया स्वकीया वास्तविकता आर्यपुत्रस्य समक्षमद्यावश्यं प्रकटीविधेया ; येन इन्द्रभीतिर्विनश्येत् ; .....कदाचित्प्रकुपितो भूत्वा आर्यपुत्रो मां शपेन्न ? ...नहि नहि, स तु मयि निजैः प्राणैरपि भृशं स्निह्यति ; स कदापि न कुपितो भविष्यति ; .....अन्यथा च समायाते देवराजे आर्यपुत्रस्य दृष्ट्याम् अहं घृणास्पदं भवितुं शक्नोमि ; ....अतः सर्वथैव मया देवराजागमनात्पूर्वमेव स्वीया वास्तविकता प्रकटनीया एव ; .....परमदयालुः आर्यपुत्रो मम वास्तविकतां श्रुत्वा निश्चप्रचमेव सुखदाश्चर्यमनुभविष्यति ; .....किन्तु प्रत्यक्षं वाचा कथने साहसं कदाचिन्न भवेत् ; ..... तर्हि किं करणीयम् ? (उपायचिन्तनं नाटयति ।) ..... उचितमस्ति ;.....पत्रे लिखित्वा समर्पयिष्यामि ; .....अयमेवोपायः सरलः श्रेयस्करश्च ; (उत्थाय भूर्जपत्रं मयूरपिच्छलेखनीं कुङ्कुमरससमसीपात्रं च आनयति; लेखनाय सज्जते ।).....केन विधिना श्रीगणेशो विधीयेत ? .....(स्मयते ।) .....हन्त,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इदं पत्रं तु प्रेमपत्रमिव आनन्दसन्दोहं जनयति ; ..... अस्तु, प्रथमं पदावलीं चिन्तयामि (चिन्तनं नाटयति ।) .....वाढम्, ... अथ लिखामि ; (लिखति ।) .....अथ पठित्वा निर्धारयामि, उचितं नवेति (प्रकाशं पठति ।)—

नाथ तवाहं जाया, दयिता सहचरी परिचारिका च ।
आयुः स्वीयं सर्वं, त्वत्सेवायां योक्तुमीहे ॥ ३ ॥
यतस्त्वां च सम्प्राप्ता, स्वर्गं मघवानं च तृणं मन्ये ।
प्रहितासं वञ्चयितुं, परन्त्वहं सेवितुं लग्ना ॥ ४ ॥
पवनं दूतं कृत्वा, ह्यो मघवा मामाह्वयत्स्वर्गाय ।
किन्तु पतिं त्वां पुत्रीं, नहि त्यक्ष्यामि निश्चयोऽयम् ॥५॥
अनिशं मनसा वाचा, कर्मणा नाथ तवैवास्मि जाता ।
इन्द्रात्परं बिभेमि, स्वीयां नाथ मेनकां रक्ष ॥ ६ ॥
आशासे दीनायाः, अबलायाश्च स्वीयमेनकायाः ।
भावं ज्ञात्वा स्वामी, विश्वामित्रः प्रसीदिष्यति ॥ ७ ॥

(पठित्वा पत्रं चुम्बति ; अकस्मात् पवनवेगो वर्धते ; बालापत्यं रोदितुम् आरभते ; मेनका तां सान्त्वयितुं प्रयतते । तदानीमेव वायुनानुगतः इन्द्रः प्रविशति ।)

इन्द्रः (रूक्षतापूर्वकम्)—मेनके !

(आत्मजासान्त्वनायां संलग्ना मेनका श्रोतुं न प्रभवति । इन्द्रः पुनस्तथैव सम्बोधयति ।)

मेनके ! !

(मेनका पुनरपि श्रोतुं न प्रभवति ; अतः इन्द्रः सरोषेण प्लुतस्वरेण तामाह्वयति ।) मेनके ! ! !

(तावत्प्रवृद्धः पवनवेगोऽपि प्रकृतिमापद्यते ; मेनका शृणोति ; श्रुत्वा मुखं तदभिमुखं करोति ; समक्षम् इन्द्रं वायुं च विलोक्य चिन्तिता भवति ; पुनः सत्वरं कृतदृढ-निश्चया स्वलिखितं तत्पत्रं दोलायाः शीर्षभागे संस्थाप्य द्वित्राणि पदानि अग्रे आगच्छति ।)

 CC-0. Agamnigam Digital Presevation Foundation, Mumbai

मेनका (साञ्जलिः)—स्वागतं देवराजस्य ; आगम्यतां स्थीयताम् । (वायुं विलोक्य) वायुदेव ! भवतोऽपि स्वागतमस्ति; आगम्यतां स्थीयताम् (उभे कुशासने ताभ्यां पृथक् पृथक् प्रसारयति ।) ।

इन्द्रः (ईषदग्रे चलित्वा सरोक्ष्यम्) - मेनके ! अहमत्र स्थातुं नैव समायातोऽस्मि ।

मेनका —तर्हि किमर्थं भवदागमः ?

इन्द्रः त्वां नेतुम् ।

मेनका (सदार्द्र्यम्)—अहं वायुदेवं कथितवती अस्मि यत्पतिं तथा आत्मजां विहाय स्वर्गलोकं न कामये । (वायुदेवः क्षणं मेनकां क्षणं च इन्द्रं पश्यति ।)

इन्द्रः (सरोषम्)—अत एव तु अहमायातोऽस्मि । त्वया चलेलिमं भविष्यति ।

मेनका (सदार्द्र्यम्)—मया तु उक्तमेव यन्नाहं पतिमपत्यं च त्यक्ष्यामि ।

इन्द्रः अप्सरसः पतिरसम्भवः ।

मेनका अप्सराः अपि स्त्री भवति; एवञ्च प्रत्येकस्याः स्त्रियाः पतिः सम्भवति । विश्वामित्रो मम गान्धर्वविधिविहितः पतिरस्ति ।

इन्द्रः मेनके ! मया त्वं विश्वामित्रं तपोविरतं विधातुं प्रेषितासीः, न तु तं पतित्वेन वरीतुम् ।

मेनका (सस्मितम्)—देवराज ! भवदादेशपालनार्थमेव मया स पतित्वेन वृतोऽस्ति; इतरथा आदेशपूर्त्तिरसम्भवासीत् ।

इन्द्रः (समार्दवम्)—अस्तु नाम ; आदेशपूर्त्तौ सत्यां त्वया पुनर्मम सभाशोभा वर्धनीयास्ति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मेनका (सस्मितम्)—देवराज ! प्रणयपरिणयवती नारी पतिगृहस्यैव शोभां वर्धयति । अपीदं न जानाति भवान् ?
नारीहते जीवनसङ्गिना न्रा

सार्धं निवासं सततं विधातुम् ।
का नाम नारी परिणीय पूर्वं
प्रेम्णा पतिं स्वं विजहाति पश्चात् ॥८॥ ?

इन्द्रः (सभ्रूकुटिभङ्गम्) –मेनके ! त्वं मदधीनासि ; अतो विश्वामित्रेण सह तत्पत्नीरूपेण निवस्तुं नैव शक्ष्यसि ।

मेनका (सदार्ढ्यम्) देवराज ! तवाधीन्यं परित्यजामि । तव स्वर्गसुखं तृणं मन्ये । महर्षिर्विश्वामित्र एव मम सर्वस्वमस्ति । भवान् मां तस्मात् पृथक् कर्त्तुं न शक्नोति ।

इन्द्रः (सव्यङ्ग्यम्)—तव साहचर्यात् क्षीणतपोबलाद् विश्वामित्रात् सम्प्रति मे मनागपि भयं नास्ति । अतस्त्वां बलान्नेष्यामि ।

मेनका (सक्रोधम्)—देवराज ! अलं तावत् अनर्गलप्रलापेन । 'क्षीणोऽपि गजराजो वृषभमददमनाय अलम्' । इदं भवान् सम्यग्जानाति ।

इन्द्रः (सक्रोधम्)—मेनके ! जिह्वा नियम्यताम् । त्वं मम शक्तिं न वेत्सि; अत एव प्रगल्भसे ।

मेनका (सव्यङ्ग्यम्)—देवराज ! अहल्यादूषणे प्रकटीभूतां ते शक्तिं को न वेत्ति ? किन्तु महर्षिविश्वामित्रपत्न्यां त्वदीया सा शक्तिरपि निष्फला भविष्यति ।

वायुदेवः (सानुनयम्)—देवि मेनके ! देवराजस्य वचोऽनुमन्यस्व; व्यर्थमेव सङ्कटं वृणीषे ।

मेनका (वायुमुखी भूत्वा)—वायुदेव ! नारीकृते पतिवरणं न कदापि सङ्कटवरणं मन्यते; अपितु संकटहरणं मन्यते ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतीयते इन्द्रतान्त्रिता। तव बुद्धिर्नूनं निद्रितास्ति। अत एव तु सर्वश्रेष्ठाय गार्हस्थ्यधर्मायापि असूयसे।

वायुदेवः (सानुनयमेव)—स्वामिनो नियोगोऽपि तु परिपालनीयो भवति।

मेनका भवति; किन्तु सन्नियोग एव। अपरञ्च स्वामी तावदेव स्वामी भवति, यावत् सेवकस्तं स्वामिनं मन्यते। (इन्द्रं सभ्रूभङ्गं विलोक्य) एनमहं स्वामिनं नैव मन्ये।

इन्द्रः (सदार्ढ्यम्)—वायो! बहु जातम्; अथाग्रे सोढुं न शक्नोमि। इयं दुर्विनीता ऋजुरीत्या न चलिष्यति। अतो बलादेनां कचे गृहीत्वा सत्वरं प्रयाहि।

वायुदेवः (सानुनयम्)—देवराज! कामिनी प्रेमपाशग्राह्या कथ्यते। तत्तथा किमपि विधीयतां यथा इयं स्वत एव भवन्तमनुवर्त्तेत।

इन्द्रः (सरौक्ष्यम्)—नहि वायो, नहि। अस्यां प्रेमपाशो न प्रभविष्यति। इयं तु बलादेव नेतव्या भविष्यति (इत्युक्त्वा स्वयमेव मेनकां ग्रहीतुमुपक्रमते)।

मेनका (स्वपृष्ठे स्खलन्ती)—देवराज! अग्रे नैव आयाहि; अबलायां बलप्रयोगाद् विरम; एनेन दुष्कर्मणा ते श्रेयो न भविष्यति।

(इन्द्रो मेनकां बलाद् गृह्णाति; द्वारदेशाभिमुखं च तां समाकर्षति; प्रतिवादं कुर्वती मेनका 'परित्रायतामार्यपुत्र! परित्रायतां महर्षिविश्वामित्र! इन्द्रेण बलादपह्रियमाणां स्वकीयां पत्नीं मेनकां परित्रायस्व' इत्युच्चैराक्रोशति; अस्मिन्नेव व्यतिकरे बालापत्यमपि क्रन्दितुमारभते; समिद्धमन्युरिन्द्रो मेनकायाः शिरसि निर्दयं मुष्टिप्रहारं करोति! येन मेनका मूर्च्छन्ती भूमौ निपतति; मूर्च्छिता च भवति।)

इन्द्रः (सक्रोधम्)—वायुदेव! किं तत्र पश्यसि? अत्रागच्छ; मूर्च्छितामिमां सत्वरं स्कन्धेन आदाय मम भवनं प्रापय।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वायुदेवः (साञ्जलिः शिरो नम्रीविधाय च)--यदाज्ञापयति देवराज !

(वायुदेवो मूर्च्छितां मेनकां स्कन्धेनादाय सत्वरं निष्क्राम्यति ; इन्द्रोऽपि भीत इव इतस्ततो विलोकयन् तमनुसरति ; मञ्चे बालापत्यस्य करुणक्रन्दनं श्रूयते ; शनैः शनैः आभ्यन्तरिको जवनिका प्रसरति; येन बालापत्यस्य तत्करुणक्रन्दनं प्रशाम्यति।)

(नेपथ्ये)

स्वार्थान्धकारपरिपूरितमानसानां
चित्ते त्रपा नहि दया नहि साधुता नो।
कार्यं विकार्यमपि ते प्रतिपादयन्ति
हा हन्त हन्त न च ते विफला भवन्ति ॥९॥

उच्चासने कृतपदोऽसितवायसो हा
हीनासने कृतपदां जयते मरालीम्।
एतावदेव नहि कष्टकरं स काकः
कूटं विधाय विदधाति मरालहेलाम् ॥१०॥

॥ इति सप्तमोऽङ्कः ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

।। अष्टमोऽङ्कः ।।

(ततः प्रविशति कण्वद्वितीयो विश्वामित्रः ।)

विश्वामित्रः (कण्वाभिमुखीभूय)– सखे कण्व !

कण्वः आं विश्वामित्र !

विश्वामित्रः तव शारद्वतनामा शिष्यः परमविनीतो वर्तते ।

कण्वः आं जानामि; स दार्शनिकशास्त्रेषु परमरुचिमानस्ति ।

विश्वामित्रः आम्; ममापि एष एव प्रत्ययः ।

कण्वः अहं तु मन्ये यत्स संसाराद् विरक्तो भविष्यति ।

विश्वामित्रः (सावधानम्)—नहि भ्रातः नहि। एवम्भूतो भवितुं स नैव आज्ञापयितव्यः ।

कण्वः किमर्थम् ?

विश्वामित्रः संसाराय ज्ञानिनामपि आवश्यकता वर्तते ।

कण्वः (सस्मितम्)—तर्हि किम् अनेनैव हेतुना त्वं संसारी जातोऽसि ?

विश्वामित्रः (सस्मितम्)—नहि ।.....अहन्तु मेनकायै संसारी भूतोऽस्मि ।

कण्वः (सस्मितम्)—जानामि । (उभौ चलनं नाटयतः ।) विश्वामित्र ! त्वया स्वात्मजायाः किं नाम कृतम् ?

विश्वामित्रः तस्याः जातायाः अद्यैव एकादशो दिवसः । अतोऽद्य तवैव सन्निधौ तन्नाम करिष्यामि ।

कण्वः (समोदम्)—शोभनं शोभनम् । एतेन तव विचारेण अहमात्मानं गौरवान्वितं मन्ये ।

विश्वामित्रः (कण्वस्कन्धे करं कृत्वा)—सखे कण्व ! एवं नैव ब्रूहि । त्वन्तु मम कृते श्रद्धाभाजनं विद्यसे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कण्वः एष तु तवानुग्रहः ।

विश्वामित्रः अथ एहि, शीघ्रं चलेवः; मेनका प्रतीक्षमाणा भवेत् ।

कण्वः एवमेव ।

(उभौ सत्वरं परिक्राम्यन्तौ मञ्चस्य दक्षिणे कोणे विलीयेते ।)

(नेपथ्ये)

हा हन्त जानाति मृगो न गूढं
व्याधस्तदीयां दयितां जहार ।
लोके खलानां खलता कदेयं
विनाशमायास्यति दीनबन्धो ॥१॥

निजं विधातुं विपुलं निकेतनं
करोति लूनं सदनं परस्य यः ।
तमीदृशं लोकनिपीडकं जनं
विजेतुकामः प्रभविष्यतीह कः ॥२॥

(ततः शनैः शनैः आभ्यन्तरिकी जवनिका अपसरति ; बालापत्यस्य मन्दं करुणक्रन्दनं श्रुतिपथं समायाति; क्षणानन्तरं मञ्चे वामकोणात् कण्वेन अनुगम्यमानो विश्वामित्रः प्रविशति ।)

विश्वामित्रः (कुटीराभिमुखम्) मेनके ! बहिरागच्छ । पश्य, कः समायातोऽस्ति । ·····मेनके ! क्वासि ? पश्य महर्षिः कण्वः समायातोऽस्ति ।····· (कण्वं प्रति) सखे ! त्वं तावदत्र समुपविश; (आसनवेदिकां दर्शयति) । अहं पश्यामि मेनका किं करोतीति ।

कण्वः एवमेव (तत्र समुपविशति ।) ।

विश्वामित्रः (ईषदभ्यन्तरं गत्वा)—मेनके ! ओ मेनके !! मेनके!!! ·····(बालापत्यम् ईषद् उच्चैः रोदितुमारभते ; कण्वस्तदभिमुखं पश्यति ।) आश्चर्यम्; क्व गता भवेत् ?

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(इतस्ततो भ्राम्यति।) ..... मेनके ! ..... (पुनः कण्वमुपैत्य) सखे ! न जाने मेनका क्व गतास्ति।

कण्वः आगच्छ, तिष्ठ ; सापि आगमिष्यति।

विश्वामित्रः (सहसा वामाक्षिस्पन्दनमनुभूय)—नहि सखे ! मदीयं वामनयनं परिस्फुरति ; मनो व्याकुलायमानमस्ति ; प्रतीयते मम मेनका क्वचिद् विपद्ग्रस्तास्ति। (इत्युक्त्वा मेनकां साम्रेडमुच्चैश्च समाह्वयन् इतस्ततः परिक्राम्यति; बालापत्यमपि उच्चैस्तरां रोदितुमारभते।)

कण्वः (उत्थाय विश्वामित्रमुपैत्य)—सखे, धीरोऽसि ; धैर्यं धारय ; रुदतीमात्मजां च सान्त्वय।

(श्रुत्वा विश्वामित्रो बालापत्यदोलाभिमुखं त्वरितं प्रयाति ; रुदतीमात्मजां च वात्सल्येन सान्त्वयति ; एवंकरणे तदीया दृष्टिः दोलास्थिते लिखिते भूर्जपत्रे पतति ; तत्र मेनकाहस्तलेखं दृष्ट्वा साशङ्कं तदादाय वाचयति—

"नाथ तवाहं जाया, दयिता सहचरी परिचारिका च।
आयुः स्वीयं सर्वं, त्वत्सेवायां योक्तुमीहे ।।

(हर्षमनुभवति।)

यतस्त्वां च सम्प्राप्ता, स्वर्गं मघवानं च तृणं मन्ये।
प्रहितासं वञ्चयितुं, परन्त्वहं सेवितुं लग्ना ।।

(विस्मयं नाटयति।)

पवनं दूतं कृत्वा, ह्यो मघवा मामाह्वयत्स्वर्गाय।
किन्तु पतिं त्वां पुत्रीं, नहि त्यक्ष्यामि निश्चयोऽयम् ।।

(चिन्तामनुभवति।)

अनिशं मनसा वाचा, कर्मणा नाथ तवैवास्मि जाता।
इन्द्रात्परं बिभेमि, स्वीयां नाथ मेनकां रक्ष।।

(क्रोधं नाटयति।)

आशासे दीनायाः, अबलायाश्च स्वीयमेनकायाः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावं ज्ञात्वा स्वामी, विश्वामित्रः प्रसोदिष्यति ।।

(उत्थाय सावेगं कण्वमुपैति ।)

कण्वः (साश्चर्यम्)—किं वृत्तम् ?

विश्वामित्रः (सावेगम्)—सखे, प्रतीयते सर्वं नष्टं जातम् ।

कण्वः (सहसोत्थाय)—नहि, नहि ; एवं नैव ब्रूहि । स्पष्टं कथय, किं जातम् ?

विश्वामित्रः (भूर्जपत्रं दर्शयन्) गृहाण पठ च ।

(कण्वस्तद्भूर्जपत्रमाददाति तथा पठति ।)

कण्वः (गम्भीरो भूत्वा)—मित्र, एतेन मेनकालिखितेन पत्रेण सिद्ध्यति यन्मेनका अप्सराः अस्ति । त्वत्तपोभीतेन इन्द्रेण तव वञ्चनायै प्रेषिता सा त्वामनुरक्ता पत्नीभावं स्वीकृतवती ; तवात्मजामपि जनितवती ।

विश्वामित्रः नात्र संशयः । किन्तु सततं मत्सेवासक्ता सेदानीं क्व गता ? (अधीरतां नाटयति ; पुनः कण्वहस्तात् तत्पत्रमादाय भूयः पठति ; चिन्तनं नाटयति ; सहसा किमपि निश्चित्यैव आकाशाभिमुखो भूत्वा उच्चैराक्रोशति) —नीच ! पामर ! देवकुलकलङ्क ! इन्द्र ! मयि जीवति त्वं मम पत्नीं नैव हर्तुं शक्नोषि । यदि स्वीयं कल्याणं वाञ्छसि, तर्हि सपदि मम पत्नीं मेनकां मुञ्च ; अन्यथा त्वां भस्मसात् करिष्यामि (इत्युक्त्वा भ्रूकुटिभङ्गं नाटयति ।)

कण्वः (विश्वामित्रमुपागत्य)—सखे ! अधीरो मा भूः ; धैर्यधना हि ऋषयः ; नियतिश्च बलीयसी ।

विश्वामित्रः (सक्रोधम्)—नहि कण्व ! देशकालौचितीहीनं तव कथनम् । दयितापहारकं को नाम सहते ?

कण्वः (सानुनयम्)—मन्ये सखे ! यद् दयितापहारकं न कोऽपि सहते । किन्तु एवं करणे अर्जितनष्टावशिष्टं तव सर्वं तपोबलं नङ्क्ष्यति ।

विश्वामित्रः (सदार्द्र्यम्)—नश्यतु नाम । न कापि चिन्ता ; दयितापहारी तु जीवितमपि दत्वा नाशनीयः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(पुनः आकाशाभिमुखो भूत्वा) अरे, रे पदमदमत्त ! सुराधमेन्द्र ! कथं चिरयसि ? मम मेनकां मह्यं सत्वरं समर्पय; अन्यथा त्वं कथावशेषो भविष्यसि ।

कण्वः (सानुनयम्) —मित्र,

द्वेषेण क्षीयते बुद्धिर्मनो रागेण क्षीयते ।
शापेन क्षीयते पुण्यं तस्मादेतत्त्रयं त्यजेत् ॥ ३ ॥

विश्वामित्रः (सदार्ढ्यम्) नहि सखे, त्वमिदं नैव जानीषे –
जायापहारकं लोके जनं यस्सहते जनः ।
निन्द्यते सोऽत्र सर्वत्र कीर्त्तिस्तस्य विनश्यति ॥ ४ ॥
अस्मात्सखे, स्वजायापहारकं स्वीयं सर्वमपि विनाश्य विनाशयिष्यामि । (पुनराकाशमालोकयन् सक्रोधम्) — अरे, रे निर्लज्ज, अहल्याजार, महनीयमहिलाशील-सम्पत्तितस्कर, स्वार्थपङ्ककलङ्कनिमग्न, गेहेनर्दिन्, अघवन्, मघवन ! अधुनावधि त्वया मम दयिता पत्नी मेनका नैव प्रत्यर्पिता; तद् भुङ्क्ष्व स्वकृतपापमहीरुहस्य स्वसर्वस्वविनाशविषफलम् ; अथाहं कठोरतमेन शापेन त्वामिदानीमेव पदच्युतं विदधामि (इत्युक्त्वा शापदानोद्यतो भवति; कण्वो व्याकुलतामनुभवति ।) ।

(अस्मिन्नेव क्षणे आकाशवाणी श्रूयते ।)

विरम विरम विश्वामित्र शापादमुष्मात्
न खलु न खलु पङ्के पातनीयो हि लोष्टः ।
क्व वत परमपूतो लब्धविप्रर्षिभावः
क्व खलु परमगृध्नुर्देवराजो निलज्जः ॥ ५ ॥

कण्वः (सत्वरं सानुनयं च) – मित्र, विश्वामित्र ! पश्य आकाशवाणी अपि त्वां शापदानकर्मणो वारयन्ती विद्यते ।

विश्वामित्रः (आकाशाभिमुखमेव वैवश्यमिव दर्शयन्)—आः कस्येयमाकाशभारती दण्डार्हमपि अदण्डयितुं समुपदिशति ? (जिज्ञासया इतस्ततो नभसि दिशो विलोकयति; ततो भूयो नभोवाणी श्रूयते) –

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

"ब्रह्मर्षे विश्वामित्र ! अहं जगत्स्रष्टा ब्रह्मा तवैव हितकामनया तपोबलविनाशकात् शापदानरूपकार्यात् त्वां वारयन्नस्मि। धैर्यं धारय; मत्प्रेषितान्नारदाच्च प्रकृतविषये विस्तरेण जानीहि।"

कण्वः (सोत्साहम्) सखे, ब्रह्मणो वचस्तु त्वया पालनीयमेव।

विश्वामित्रः (विवशतापूर्वकम्)—आः का गतिः ?

(स्वशिरो गृहीत्वा उपविशति।)

(नेपथ्ये)

श्रीमन्नारायण नारायण नारायण।
श्रीमन्नारायण नारायण नारायण॥

कण्वः (सोत्साहम्)—मित्र ! मन्ये देवर्षिनारदः पदार्पणं कुर्वन्नस्ति।

विश्वामित्रः (सचिन्तम्)—एवम्।

(ततः श्रीमन्नारायणेति गायन् नारदः प्रविशति।)

कण्वः (साञ्जलिः)—देवर्षे ! प्रणमामि।

नारदः (अभयमुद्रां नाटयन्)—नारायण, नारायण।

विश्वामित्रः (उत्थाय साञ्जलिः)—प्रणमामि देवर्षे !

नारदः (तथैव)—नारायण, नारायण। (पुनः विश्वामित्रस्कन्धे पाणिमारोप्य) ब्रह्मर्षे, विश्वामित्र ! भवता सह, इन्द्रेण यदनार्यमाचरितम्, तद् विज्ञाय जगत्स्रष्टा ब्रह्मा दुःखमनुभूतवानस्ति। तेन इन्द्रो भृशं धिक्कृतोऽप्यस्ति।

विश्वामित्रः (सेषद्भ्रूकुटिभङ्गम्)— यदि सर्वलोकस्रष्टुर्ब्रह्मणो दृष्टौ इन्द्रः अपराधी विद्यते, तर्हि सः इन्द्राय शापदानकर्मणो मां किमर्थं वारयति ?

नारदः (सगाम्भीर्यम्)—ब्रह्मर्षे ! ब्रह्माणमन्यथा नैव मन्यताम्। स नैव वाञ्छति यन्मेनकासाहचर्यनष्टावशिष्टं भवत-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्तपोबलं शापदानकर्मणा क्षयं व्रजेत् ; तेन च महा-प्रयत्नलब्धो भवतो ब्रह्मर्षिभावोऽभावं प्राप्नुयात् ।

विश्वामित्रः (सचिन्तम्)—किन्तु मेनकां विना अहं जीविष्याम्यपि नैव ।

नारदः —मेनकापि भवन्तं विना न जिजीविषति ।

विश्वामित्रः (सावेगम्)—क्वास्ति मम मेनका ? (साञ्जलिः) ब्रूहि देवर्षे ! क्वास्ति सा ?

नारदः (सस्मितम्)—ब्रह्मर्षे ! धैर्यं धारय । भवतोर्द्वयोर्भावं ब्रह्मा जानाति; अतएव तेन इन्द्रदास्यान् मेनका मोचितास्ति ; तथा तस्यै परामर्शो दत्तोऽस्ति यत् "महर्षि-मारीचाश्रमे सा तपस्यां विदधीत ; यतोहि तपस्या-फलेनैव सा ब्रह्मर्षिं विश्वामित्रं सर्वस्मै समयाय पतित्वेन प्राप्तुं शक्ष्यति ; यथाकालं च आत्मजामपि तत्रैव द्रष्टुं शक्ष्यति" अतएव ब्रह्मवचसि निष्ठामाधाय सा सम्प्रति मारीचाश्रमं प्राप्तवती अस्ति ।

विश्वामित्रः (अधीरो भवन्नाकाशे च पश्यन्)—हा देवि, मेनके ! किमिदं संवृत्तम् ?

हा हा देवि ! द्रवति हृदयं चेतना नश्यतीव
मन्ये सर्वं जगदिदमहं वह्निज्वालावलीढम् ।
इन्द्रे धूर्त्ते प्रतिफलविधिं ब्रह्मदेवो रुणद्धि
हा किं कुर्यां नहि मम मनो मेनके ! याति शान्तिम् ॥६॥

त्वं मे त्वासीर्हृदयदयिता धर्मपत्नी मनोज्ञा,
प्रेष्ठा शिष्या ललितसचिवा दुर्लभं नित्यमित्रम् ।
सर्वस्वं वै व्यपगतमभून्मामकं त्वां विनाऽद्य
हा, का वीथी ? भवतु हि यया दर्शनं तावकीनम् ॥७॥

(मूर्च्छति; कण्वनारदौ समुपचरतः ।)

कण्वः (अधीरो भूत्वा)—विश्वामित्र ! ·····विश्वामित्र ! ···विश्वामित्र ! ·····

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

(व्याकुलायमानो नारदं पश्यति ।)

नारदः (सचिन्तम्)—महर्षे ! विश्वामित्र ! नयने उन्मीलय; धैर्यं च धारय; यद् भवितव्यमासीत्, तत्तु भूतवत् ।...

कण्वः (सदुःखम्)—सखे ! नेत्रे उन्मीलय; अधीरो मा भूः । (विश्वामित्रः शनैः शनैः चेतनां लभते ।)

नारदः महर्षे ! मेनकाविषयिणीं भावत्कीं रतिं विज्ञाय भगवता वेधसा भवदर्थमपि एकः सन्देशः प्रहितोऽस्ति ।

विश्वामित्रः (सदैन्यम्)—कथयतु; किमादिशति विधाता ?

नारदः इदमेव यद् भवान् तपोबलविनाशकाद् इन्द्राय शापदान-व्यापाराद् विरम्य मेनकावाप्तौ प्रतीतिमाधाय आत्म-बलवर्धकं तपस्तपतु । कालेन सा पत्नीभावेन भवता सार्धं सदा निवत्स्यति ।

विश्वामित्रः (सोच्छ्वासम्)—देवर्षे ! विधातुरेषा मध्यस्थता पक्षपात-पूर्णा प्रतिभाति ।

नारदः (सविस्मयम्)—कथम् ?

विश्वामित्रः इत्थं यत्स मां तु प्रतीकारकरणाद् न्यवारयत् ; किन्तु मज्जायापहारकं दुराचारिणम् इन्द्रं मनागपि नादण्डयत् ।

नारदः (सस्मितम्)—महर्षिप्रवर ! एवं नास्ति ।

विश्वामित्रः (सजिज्ञासम्)—तर्हि किमस्ति ?

नारदः (सगाम्भीर्यम्)—विधाता इन्द्रं स्वयं गत्वा सर्वेषां समुपस्थितानां देवानां समक्षं सूचितवानस्ति यद् "महर्षि-विश्वामित्रजायापहरणकरणरूपेण महापापेन हे इन्द्र ! तव पुण्यराशेः भूयान् भागः परिक्षीणोऽस्ति । येन तव पदच्युतिरपि नेदीयसी जातास्ति । अथाग्रे यदि त्वया महर्षिविश्वामित्राय तज्जायायै मेनकायै वा मनागपि कष्टं दास्यते, तर्हि तत्क्षणमेव नष्टावशिष्टपुण्यराशि-नाशात् तव पदच्युतिः सुनिश्चितास्ति ।"

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विश्वामित्रः (सविस्मयम्)—एवम् ?

नारदः (सगाम्भीर्यम्)—आम्; एवमेवास्ति।

(विश्वामित्रो विचारलीनो भवति)

कण्वः (सगम्भीरोच्छ्वासम्)—

साधुजनं परिदग्धुं, वह्निज्वालां ज्वालयति यो जिह्मः।
दह्यते तया स एव, साधुं पाति साधुता तस्य ॥ ८ ॥

नारदः (कण्वं पश्यन् सगाम्भीर्यम्)—नात्र कश्चित्संशयः। (ततो विश्वामित्रस्कन्धे पाणिमाधाय)—महर्षे! किं चिन्तयसि? अथाहं चिचलिषामि। मन्ये, अथ शान्तो भविष्यसि।

विश्वामित्रः (सनिर्वेदम्)—देवर्षे! धातुरिच्छा बलीयसी।

नारदः (सस्मितम्) महर्षे! श्रेयसी चापि।

विश्वामित्रः (तथैव)—आम्, मन्ये; (सोच्छ्वासम्) अत एवाथ तदेव करिष्यामि, यद् विधाता उपादिशत्।

नारदः (समोदम्)—शोभनं शोभनम्। अथाहं चलामि। (कण्वविश्वामित्रौ प्रणाममुद्रां प्रदर्शयतः; नारदश्च 'श्रीमन्नारायण नारायण नारायण' इति साम्रेडं गायन् निष्क्राम्यति।)

कण्वः (ससन्तोषम्)—सखे! त्वया विधातुराज्ञा अङ्गीकृता, इति प्रसीदामि।

विश्वामित्रः (सभ्रूसङ्कोचम्)—किन्त्वत्र मेनकायाः प्राप्त्याशा एव कारणम्।

कण्वः (सगाम्भीर्यम्)—इदमहं जानामि।

(बालापत्यं पुनर्जागर्ति; मन्दं मन्दं च रोदितुमिव प्रारभते; उभौ तदभिमुखं पश्यतः।)

विश्वामित्रः (कण्वं पश्यन्)—मन्ये, इयमपि मातृवियोगे रोदिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कण्वः नहि, प्रतीयते क्षुधिता तृषिता वास्ति ।

विश्वामित्रः एवञ्चेत्तर्हि पयः पाययामि ।

(विश्वामित्रः वात्सल्यपूर्वकं तां क्रोडे निधाय गव्यं पयः पाययति; पयः पीत्वा सा निर्निमेषं कण्वं द्रष्टुमारभते; कण्वस्तस्याः भालं वात्सल्येन स्पृशति; अकस्मात् विश्वामित्रश्चिन्तितो भवति ।)

कण्वः (ससंवेदनम्)—मित्र ! किं चिन्तयसि ?

विश्वामित्रः (सचिन्तम्)—सखे ! चिन्तयामि यत् तपश्चरणम् आत्मजाभरणं चेत्युभयं केन विधिना सम्भविष्यति ।

कण्वः (ईषच्चिन्तयित्वा)—मित्र ! एकाकिना त्वया इदमुभयन्तु दुष्करमेव ।

विश्वामित्रः (सोच्छ्वासम्)—आं सखे ! अहमपि इदमेव अनुभवन्नस्मि । अत एव विचारयामि यद् यदि भावत्कं साहाय्यं लभ्येत तर्हि उभयं सिद्धं भवेत् (साभिप्रायं कण्वमुखं पश्यति ।) ।

कण्वः (सौत्सुक्यम्)- मम साहाय्यम् ?

विश्वामित्रः (सशिरःकम्पम्)- आम्; भवत्साहाय्यम् ।

कण्वः (सजिज्ञासम्)—यद्येवमस्ति, तर्हि निस्संङ्कोचं कथयः; अहं भवत्कृते सर्वं करिष्यामि ।

विश्वामित्रः (सानुनयम्)- महर्षिप्रवर ! भवान् मम अभिन्नमनाः सखा । अतो वाञ्छामि यद् भवान् ममास्या आत्मजायाः भरण-पोषणादिरूपं पितृत्वभारं निर्वहतु; येनाहमस्यां वीतचिन्तो भूत्वा तपश्चरितुं शक्नुयाम् ।

कण्वः (ईषच्चिन्तयित्वा सहर्षम्)—उचितमस्ति मित्र । एवमेवास्तु ।

विश्वामित्रः (सोच्छ्वासम्)—सर्वथैव धन्यवादार्हो भवान् । अहं सर्वदैव कृतज्ञो भविष्यामि । (ततः प्रबलेन वात्सल्येन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आत्मजां दृष्ट्वा चुम्बित्वा च) .....सखे ! अथैनां भवानेव गृह्णातु ; अद्यारभ्य भवानेव अस्याः पिता (आत्मजां कण्वाय समर्पयति ।) ।

कण्वः (तां सवात्सल्यं करयोराददानः)—अस्याः किमपि नामापि तु क्रियताम् ।

विश्वामित्रः (सगाम्भीर्यम्)—सखे ! अथ तु भवानेवास्याः पितास्ति । अतो भवतैव अस्याः यथारुचि किमपि नाम क्रियताम् ।

कण्वः (सस्मितम्)—हन्त ! एषा वार्तास्ति ?

विश्वामित्रः (सगाम्भीर्यम्)—आं सखे ! एषैव वार्तास्ति ।

कण्वः (बालिकायाः वदनं केशराशिं च भूयो भूयो विलोकयन् समोदविस्मयं च)—पश्य मित्र ! अस्याः कुन्तलास्तु शकाराकाराः शोभन्ते ।

विश्वामित्रः (पश्यन्)—आँ सखे ! भवता तथ्यं कथ्यते ।

कण्वः (सहर्षम्)—मित्र ! अहं चिन्तयामि यद् 'यतोऽस्याः शकारेण तुल्याः कुन्तलाः सन्ति, अतोऽस्याः 'शकुन्तला' इत्येव नाम विधीयेत ।'

विश्वामित्रः (सानन्दम्)—सखे ! शोभनस्ते कल्पः ।

कण्वः (सहर्षम्)—अथ तर्हि अस्याः नाम 'शकुन्तला' इत्येव निश्चिनोमि (बालिकायाः शिरसि जिघ्रति ।) ।

विश्वामित्रः (सवात्सल्यम्)—

वहति यावदघारिसुरापगा
तपति भानुरनामयकारकः ।
भवतु तावदियं धरणीतले
प्रथितकीर्त्तिमतीह शकुन्तला ॥ ६ ॥
(बालिकाभालं चुम्बति ।)

कण्वः (सवात्सल्यम्)—मित्र ! ममापीयमेव शुभाशंसा, यद्—
वहेद् यावद् गङ्गा नरकभयभङ्गा भगवती
तपेद् यावद् भानुः सकलसुखहेतुर्दिनमणिः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भवेद् यावद् भूमौ निखिलनिधिभूमिर्हिमगिरिः
चलेदस्तास्तावत् परमरमणीया परिकथा ॥ १० ॥

विश्वामित्रः (कृतज्ञतां दर्शयन्)—सखे ! भवदाशंसितं सर्वं सम्पत्स्यते इति मम प्रत्ययः । (बालिकां वीक्ष्य) एनां भवदङ्के निधाय वीतचिन्तोऽस्मि । अथ मामनुजानातु तपस्तप्तुमितो गमनाय ।

(आसनं कमण्डलुं चादाय गन्तुमुपक्रमते ।)

कण्वः (सदुःखम्)—मित्र ! क्व यास्यसि ?

विश्वामित्रः (सोच्छ्वासम्)—सखे ! अनिश्चितमेतद् ।

(मञ्चस्य वामकोणाभिमुखं प्रतिष्ठते ।)

कण्वः (सोच्छ्वासं तं पश्यन्) - शुभास्ते सन्तु पन्थानः ! शुभास्ते सन्तु पन्थानः !! शुभास्ते सन्तु पन्थानः !!!

(बालिकामङ्के दधानो मञ्चस्य दक्षिणकोणाभिमुखं प्रतिष्ठते । तत्प्रस्थानसमकालमेव जवनिकापि तमनुसरन्तीव प्रसरति ।)

॥ इत्यष्टमोऽङ्कः ॥

॥ इत्थं च समाप्तमिदं डॉक्टर-हरिनारायण दीक्षितविरचितं मेनकाविश्वामित्रं नाम नाटकम् ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

E.B.L. Oriental Series:

1. MUSIC SYSTEMS IN INDIA (A Comparative study of some of the leading music systems of the 15th, 16th, 17th & 18th centuries) 1984—V.N. Bhatkhande 45.00
2. SAMKHYA-YOGA EPISTEMOLOGY (1984)—Shiv Kumar 85.00
3. PROBLEM OF RELATIONS IN INDIAN PHILOSOPHY —Dr. Sarita Gupta (1984) 50.00
4. बृहत्त्रयी—एक तुलनात्मक अध्ययन (किरातार्जुनीय, शिशुपालवध तथा नैषधीयचरित के कथावस्तु, नायक एवं रस पर आधारित)—डॉ० सुषमा कुलश्रेष्ठ (१९८३) 150 00
5. MAHĀBHĀGAVATA PURĀṆA (An Ancient Treatise on SAKTI CULT, Upa-Purāṇa) Text in Devanāgarī with Critical Introduction in Eng & Index—Dr. Pushpendra Kumar (1983) 140-00
6. KṚṢṆA-KĀVYA IN SANSKRIT LITERATURE (With special reference to Śrīkṛṣṇavijaya, Rukmiṇīkalyāṇa and Harivilāsa)—Dr. Raj Kumari Kubba (1982) 60-00
7. SAMKHYA THOUGHT IN THE BRAHMANICAL SYSTEMS OF INDIAN PHILOSOPHY —Dr. Shiv Kumar (1983) 150.00
8. YOGA-KARṆIKĀ OF NATH AGHORANANDA (An Ancient Treatise on Yoga, Sanskrit Text, English Introduction and Index—Ed. Dr. N.N. Sharma (1981) 50-00
9. TANTRAS : Their Philosophy and Occult Secrets —D.N. Bose and H.L. Holadar (1981) 40-00
10. ŚYAINIKA ŚĀSTRAM (The Art of Hunting in Ancient India)—Ed. Dr. Mohan Chand (1982) 70-00
11. GARHWAL HIMALAYAS : A Historical Survey (Political and Administrative History of Garhwal 1815-1947)—Dr. Ajay Singh Rawat (1983) 60-00
12. JAINA THEORIES OF REALITY AND KNOWLEDGE Dr. Umrao Singh BIST 35-00
13. महाकवि ज्ञानसागर के काव्य एक अध्ययन —डा० किरण टण्डन (१९८४) 160-00
14. आनन्द रामायण का सांस्कृतिक अध्ययन—डा० अरुण गुप्ता (१९८४) 90.00
15. महाभारत में शान्ति पर्व का आलोचनात्मक अध्ययन —डा० सुमेधा विद्यालङ्कार (१९८४) 75 00
16. अनुमान-प्रमाण—डा० बलिराम शुक्ल (१९८५) (प्रेस)
17. मिथक साहित्य : विविध संदर्भ—उप सं० डा० उषा पुरी विद्यावाचस्पति (१९८४) ६०.००

Please mail your order to

Eastern Book Linkers
(INDOLOGICAL PUBLISHERS & BOOKSELLERS)
5825, New Chandrawal, Jawahar Nagar,
DELHI-110007